दैनिकम् ई-संस्कृतवार्तापत्रम्

हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ हेमन्त-ऋतुः
सूर्यः दक्षिणायनम् कार्तिककृष्णद्वादशी
कार्तिक 21 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-12 ■ वर्ष-6 ■ अङ्क-12 | 1 | नवम्बर 06, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 युवा-ओलम्पिक्-क्रीडासु तन्वी-पत्री इत्यनया महिला-बैडमिण्टन्-स्पर्धायाः अन्तिम-चक्रे स्थानमवाप्य रचितः इतिहासः

4 भरमौर-क्षेत्राय मुख्यमन्त्रिणः महदोपहाराः पञ्चसु स्थानेषु उद्घाट्यिन्ते सीबीएसई-विद्यालयाः, होली- उत्तराला-मार्गाय १८ कोटिरूप्यकाणि

11 संस्कृतभाषायाः प्रचारप्रसाराय अनन्य- आरम्भः संस्कृत-भारत्याः उत्तरबङ्गप्रान्तस्य सप्तदिवसीयस्य आवासीयप्रबोधनवर्गस्य भव्यः समापनसमारोहः

प्रधानमन्त्रिणा एशियाई-पैरा-क्रीडायां भागं निर्व्यढवता भारतीय-क्रीडक-दलेन सह विहितः प्रत्यक्ष-संवादः



प्रधानमन्त्री नरेन्द्रमोदी नवदेहल्यां षड्विंशत्यधिक-द्विसहस्रतमस्य एशियाई-पैरा-क्रीडायां भागं गृहीतवद्भिः भारतीय-क्रीडक-दलस्य सदस्यैः सह सम्भाषणम् अकरोत्। जापानस्य आइची-नागोया-नगरे अस्मिन् वर्षे आयोजितासु एशियाई-पैरा-क्रीडासु भारतेन स्वकीयम् अद्यावधि-पर्यन्तं सर्वोत्कृष्टं प्रदर्शनं पञ्जीकृतम्। आहत्य सप्तनवतिः भारतीय-पैरा-क्रीडकाः चतुर्दशाधिक-शतं पदकानि विजितवन्तः, येषु त्रिंशत् स्वर्ण पदकानि, पञ्चत्रिंशत् रजत-पदकानि, नवचत्वारिंशत् कांस्य पदकानि च समाविष्टानि सन्ति। अस्मिन् भव्य-समारोहे पदक विजेतारः क्रीडकाः, प्रशिक्षकाः, भारतीय-पैरालम्पिक्-समित्याः भारतीय-ओलम्पिक्-सङ्घस्य च अधिकारिणः, राष्ट्रिय-क्रीडा-महासंघानां प्रतिनिधयः, अथ च युवकार्य-क्रीडा-मन्त्रालयस्य उच्चाधिकारिणः उपस्थिताः आसन्। भारतं जागतिक-स्तरे एकस्याः प्रमुख-क्रीडा-शक्तेः रूपेण समुदेति - प्रधानमन्त्री ।

प्रधानमन्त्रिणा नरेन्द्र-मोदिना जापान-देशस्य ऐचि-नागोया-नगरे सम्पन्नायाम् एशियाई-पैरा-क्रीडायां उत्कृष्ट प्रदर्शनं कृतवतां भारतीय-पैरा-क्रीडकानां दलेन सह साक्षात् अभिनन्दनं विधीयते। अस्मिन् सम्भाषणे तेन प्रतिपादितं यत् भारतं जागतिक-स्तरे एकस्याः प्रमुख-क्रीडा-शक्तेः रूपेण समुदेति । मोदिना उक्तं यत् एतैः पैरा-क्रीडकैः पुनरेकवारं दर्शितं यत् असाधारण-सिद्ध्यः केवलं दृढ-सङ्कल्पेन, साहसेन, अविरत परिश्रमेण च लभ्यन्ते। तेषां कीर्तिमानैः अशेषः देशः सम्मोदते ।

निर्वाचनायोगेन चतसृषु राज्येषु द्वयोः केन्द्रशासित प्रदेशयोश्च मतदातृसूचीनां विशेष-संक्षिप्त-पुनरीक्षणस्य उद्घोषणा कृता



भारतीय-निर्वाचनायोगेन अरुणाचलप्रदेशे, चण्डीगढे, दादरा-नगरहवेली-दमन-दीवक्षेत्रे, मिज़ोरमराज्ये, ओडिशायां सिक्किमे च मतदातृ-सूचीनां विशेष-संक्षिप्त-पुनरीक्षणस्य घोषणा कृता। एतदर्थं सप्तविंशत्यधिक-द्विसहस्रतमवर्षस्य जनवरी-मासस्य प्रथम-दिनाङ्कः पात्रता-तिथित्वेन उद्घोषितः। आयोगानुसारम्, मतदान-केन्द्राणां युक्तीकरणस्य पुनर्व्यवस्थायाश्च कार्यम् अस्यैव मासस्य विंशति-दिनाङ्क यावत् सम्पूर्तिमेष्यति। अथ च एकीकृत-प्रारूप-मतदातृ-सूचीनां प्रकाशनं नवम्बरमासस्य त्रिंशद्दिनाङ्के विधास्यते। आक्षेपाणां च पञ्जीकरण-कालः नवम्बरमासस्य त्रिंशद्दिनाङ्कात् दिसम्बरमसस्य त्रिंशद्दिनाङ्कपर्यन्तं भविष्यति। प्राप्तानां समग्राक्षेपाणां निस्तारणम् आगामी वर्षस्य जनवरी-मासस्य अष्टादश-दिनाङ्क यावत् सम्पादयिष्यते। तदनन्तरं संशोधित-मतदातृ-सूचीनाम् अन्तिम-प्रकाशनं सप्तविंशत्यधिक-द्विसहस्रतमवर्षस्य जनवरी-मासस्य एकविंशति-दिनाङ्के भविष्यति।

सुभाषितम्

यस्य नास्ति स्वयं प्रज्ञा
शास्त्रं तस्य करोति किम्।
लोचनाभ्यां विहीनस्य
दर्पणः किं करिष्यति।।


भावार्थः- जिस व्यक्ति के पास स्वयं का विवेक नहीं है। शास्त्र उसका क्या करेगा? जैसे नेत्रहीन व्यक्ति के लिए दर्पण व्यर्थ है।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्तापत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्राकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमलदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा

भारतेन गयाना-देशे मार्ग-स्वास्थ्य-रक्षा-परियोजनाभ्यः पञ्चशत-मिलियन डॉलर-परिमितस्य ऋण-साहाय्यस्य कृता उद्घोषणा

विदेशमन्त्री डॉ.एस.जयशङ्करः एन्टिग्वा-एण्ड-बारबुडा-देशे गयाना-देशस्य राष्ट्रपतिना डॉ. मोहम्मद-इरफान-अली-महोदयेन सह द्विपक्षीय चर्चाम् अकरोत्। अस्मिन् मेलने भारतेन गयाना-देशाय मार्ग-स्वास्थ्य-रक्षा-क्षेत्राणां परियोजनाभ्यः पञ्चशत-मिलियन डॉलर्-परिमितस्य ऋण-विस्तारस्य घोषणा कृता। उभौ नेतारौ व्यापार-निवेश-ऊर्जा-कृषि-आधारभूतसंरचना-विकास-अङ्कीयप्रौद्योगिकी-क्षमतावर्धन-सहितेषु सुदृढ़ीकरणाय उपायान् चर्चितवन्तौ। परस्पर-हित-सम्बद्धेषु सहयोगस्य विदेश-मन्त्रालयेन सामाजिक सञ्जारपटले संसूचितं यत् भारतेन पूर्वमेव गयाना-देशे बह्वयः विकास-परियोजनाः सफलीकृताः, अथ च अनेन नूतनेन ऋण-विस्तारेण द्वयोः देशयोः मध्ये विकास-सहभागिता अधिका सुदृढा भविष्यति। अस्मिन् अवसरे द्वयोः देशयोः मध्ये त्रयः अनुबन्धाः हस्ताक्षारिताः, येषु सूक्ष्म-लघु-उद्योगेभ्यः उत्पादन प्रकल्पानाम् आपूर्तिः संस्थापनं च, अथ च त्वरित-प्रभाव-परियोजनानां क्रियान्वयनार्थम् अनुदान-साहाय्यं समाविष्टम् अस्ति।

अमित शाहेन हरियाणा-राज्यस्य करनाल-नगरे भारतीय-जनता-दलस्य 'लोकतंत्र-रक्षण, अराजकता समाप्तीति अभियानस्य अन्तर्गतं आयोजितायाः पदयात्रायाः नेतृत्वं विधीयते



केन्द्रीय गृहमन्त्रिणा अमित शाहेन हरियाणा-राज्यस्य करनाल-नगरे भारतीय-जनता-दलस्य 'लोकतंत्र-रक्षण, अराजकता समाप्तीति अभियानस्य अन्तर्गतं आयोजितायाः पदयात्रायाः नेतृत्वं विधीयते। यात्रायाः प्रारम्भात् प्राक् जनसमूहं सम्बोधयन् श्रीशाहः ब्रूते यत् लोकतन्त्रे संसद् चर्चायाः सर्वोच्चं मञ्चं वर्तते; परं कांग्रेस-दलस्य नेता राहुल गांधी न तु संसदः कार्यं प्रचालयति, न च संसद्-चर्चासु भागं गृह्णाति। हरियाणा-राज्ये आयोजिते अस्मिन् समारोहे केंद्रीय ऊर्जा मन्त्री मनोहर लालः, मुख्यमन्त्री नायब-सिंह-सैनी, विधानसभाध्यक्षः हरविन्दर-कल्याणः, भारतीय जनता दलस्य प्रदेशाध्यक्षा डा. अर्चना-गुप्ता, हरियाणा-सर्वकारस्य अन्ये बहवः मन्त्रिणश्च सोत्साहं भागं भजन्ते ।

पञ्जाब-राज्ये जनसङ्ख्या-गणनायाः द्वितीयं चरणम् आगामी-मासस्य प्रथमदिनाङ्कात् प्रारभ्यते

पञ्जाब-राज्ये जनसङ्ख्या-गणनायाः द्वितीयं चरणम् आगामी-मासस्य प्रथमदिनाङ्कात् सप्तविंशत्युत्तरद्विसहस्रतमवर्षस्य जनवरी-मासस्य चतुर्थ-दिनाङ्क यावत् सम्पद्यते। अस्याः गणनायाः पुनरीक्षण-चरणं आगामिवर्षस्य जनवरी-मासस्य नवम-दिनाङ्क यावत् विधीयते। राज्यस्य विशेष-प्रभार-क्षेत्राणां नोडल अधिकारिणां कृते एकस्य समीक्षोपवेशनस्य आयोजनं क्रियते, यत्र नागरिक-गणनाधिकारिणां प्रवेशो नियन्त्रितो वर्तते, तादृश क्षेत्रेषु सुरक्षिततया, समयबद्धतया च गणनायाः निष्पादनं सुनिश्चितं क्रियते। अस्यां चर्चायाम् अधिकारिणां निकषा समन्वयः प्रवर्धते, येन निर्धारित समयानुगुणं कार्यक्रमानां सम्पन्नता सिध्यते। चण्डीगढ़-क्षेत्रे जनवरी-मासस्य दशमात् चतुर्विंशति-दिनाङ्क यावत् स्व-गणना सञ्चालिष्यते। ततः परं मार्च-मासस्य प्रथमात् पञ्चम-दिनाङ्क यावत् पुनरीक्षणचरणमपि सम्पादयिष्यते।

युवा-ओलम्पिक्-क्रीडासु तन्वी-पत्री इत्यनया महिला-बैडमिण्टन्-स्पर्धायाः अन्तिम-चक्रे स्थानमवाप्य रचितः इतिहासः



सेनेगल-देशस्य डकार-नगरे सम्पद्यमानायां युव-ओलम्पिक्-स्पर्धायां युव-बैडमिण्टन्-क्रीडिकया तन्वी-पत्री इत्यनया इतिहासः रच्यते। सा अस्याः स्पर्धायाः महिला एकल-वर्गस्य अन्तिम चरणं प्रविष्टा प्रथमा भारतीय क्रीडिका वर्तते। तन्वी चतुःपञ्चाशत्-निमेषात्मक-कठोर-सङ्घर्षे जापान-देशस्य युजुनो-वातानाबे इत्येतां एकविंशतिः चतुर्दश, एकादश एकविंशतिः, एकविंशतिः -नवदश इत्येतेन अंकान्तरालेन पराजित्य उपाधि-स्पर्धायां स्व-स्थानं लब्धवती। इतः प्राक् अपि सा थाईलैण्ड-देशस्य कुङ्कौ-ककानिक् इत्येतां पराभूय उपान्त्यचरणं प्रविष्टा प्रथमा भारतीय-नारी अभवत्।

भारतीय-ऋतु-विज्ञान-विभागेन रविवासरं यावत् तटीय-आन्ध्रप्रदेशे, दक्षिण-आन्तरिक-कर्नाटके, तमिलनाडु-राज्ये, केरले च अति-वृष्टेः पूर्वानुमानं प्रकटितम्



भारतीय-ऋतु-विज्ञान-विभागेन रविवासरं यावत् तटीय-आन्ध्र प्रदेशे, दक्षिण-आन्तरिक-कर्नाटके, तमिलनाडु-राज्ये, केरले च अति-वृष्टेः पूर्वानुमानं प्रकाश्यते ।ऋतुविभागः अनुमिमीते यत् आगामी-द्वि-त्रि-दिनेषु ओडिशायाम्, तटीय कर्नाटके, केरले, माहे-क्षेत्रे, तमिलनाडु-राज्ये, पुदुच्चेरी-कराईकल क्षेत्रयोः च विद्युत्-निघोषैः तीव्र-झञ्झावातेन च सह महती वृष्टिः प्रवर्तिष्यते।



अंशविपणिः

भारतीयांशविपण्यां महती वृद्धिः, मुंबई,दिनाङ्कः – ५ नवम्बर २०२६ हिमसंस्कृतवार्ताः- डॉ विमलेश झा

भारतीयांशविपण्यां गुरुवासरे महती वृद्धिः अभवत्। बीएसईसेन्सेक्ससूचकांकः २००८ अङ्कैः वर्धित्वा ७९,३१० अङ्केषु तथा एनएसईनिफ्टी-५०सेंसैक्ससूचकांकः ५७६ अङ्कैः वर्धित्वा २४,५३६ अङ्केषु आगतः। विपण्याम् एषा वृद्धिः निरन्तरं षष्ठे व्यवसायदिवसे अपि दृष्टा। निवेशकानां विश्वासः निरन्तरं वर्धते। अमेरिकादेशस्य मध्यावधिकनिर्वाचनपरिणामैः वैश्विकविपण्याः सकारात्मकं वातावरणम् उत्पन्नम् अभवत्। अपरिष्कृततैलस्य मूल्येषु न्यूनता तथा विदेशीयनिवेशकानां प्रबलक्रयणं भारतीयविपण्याः वृद्धये महत्त्वपूर्णं कारणम् अभवत्।वाहनक्षेत्रे, वित्तीयसेवाक्षेत्रे, अचलसम्पत्तिक्षेत्रे, सूचनाप्रौद्योगिकीक्षेत्रे तथा बैंकिङ्गक्षेत्रे निवेशकैः उत्साहपूर्वकं क्रयणं कृतम्। अस्याः तीव्रवृद्धेः परिणामस्वरूपं निवेशकानां सम्पत्तौ महती वृद्धिः अभवत्। बीएसईइत्यस्य विपण्यापूँजीकरणं ५०० लक्षकोटिरूप्यकाणाम् अधिकम् अभवत्। अर्थविशेषज्ञैः उक्तं यत् वैश्विकपरिस्थितीनां सुधारः, कच्चातैलस्य मूल्येषु न्यूनता, विदेशीयनिवेशकानां सक्रियता च भारतीयशेयरविपण्याः सकारात्मकगतये प्रमुखं कारणम् अस्ति। आगामिषु व्यवसायदिवसेषु अपि निवेशकाः वैश्विकविपण्याः स्थितिम्, संयन्त्राणां वित्तीयपरिणामान् तथा निवेशप्रवाहं प्रति विशेषं ध्यानं दास्यन्ति।

ग्रामपञ्चायते ग्रामचौपालस्य आयोजनम्। सिद्धार्थनगरे विकासकार्याणां समीक्षा भविष्यति

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, सिद्धार्थनगरम्। उत्तरप्रदेशस्य सिद्धार्थनगरजनपदे ग्रामविकासकार्याणां समीक्षार्थं ग्रामचौपालस्य आयोजनं भविष्यति।प्राप्तसूचनानुसारं नवम्बरमासस्य षष्ठे (06) दिनाङ्के अपराह्णे द्वादशवादने विकासखण्डस्य नौगढ़क्षेत्रे स्थितायां पलिया टेकधर ग्रामपञ्चायते ग्रामचौपालस्य आयोजनं निश्चितम् अस्ति। अस्य कार्यक्रमस्य अध्यक्षता जिलाधिकारी महोदयः करिष्यति। मुख्यविकासाधिकारी बलवीर सिंह महोदयेन जनपदस्य सर्वेभ्यः सम्बन्धितेभ्यः अधिकारिभ्यः निर्देशः प्रदत्तः यत् ते समयेन कार्यक्रमस्थले उपस्थिताः भूत्वा स्वस्व दायित्वानां निर्वहनं कुर्वन्तु। मुख्यविकासाधिकारी महोदयेन स्पष्टं निर्देशितं यत् कार्यक्रमे कस्यापि प्रकारस्य प्रमादः अथवा लापरवाही न भवेत्। सर्वैः अधिकारिभिः अनिवार्यरूपेण सहभागिता कर्तव्या।

धनबलेन विधायकान् स्वपक्षकारी भाजपादलम् अधुना करोति लोकतन्त्रस्य वार्ता



हिमसंस्कृतवार्ताः- चम्बा। मुख्यमन्त्री सुखविन्दरसिंहसुक्खु-महोदयः भाजपादलं लोकतन्त्रस्य संविधानस्य च नाम्नि द्विविध-आचरणस्य आरोपम् अकरोत्। चम्बा- मण्डलस्य लिल्ह-क्षेत्रे गुरुवासरे जनसभां सम्बोधयन् सः संसदसदस्यम् (सांसद) अनुरागठाकुरं प्रतिपक्षनेतारं जयरामठाकुरं च अभिलक्ष्य तीक्ष्णं प्रहारं विहितवान्। सः अवदत् यत् भाजपादलेन पूर्वं मतानां चौर्यं कृत्वा सत्ता प्राप्ता, अनन्तरं च धनबलस्य साहाय्येन काङ्ग्रेसदलस्य विधायकाः स्वपक्षे आनीताः। जनादेशस्य अनादरं कुर्वती भाजपा अधुना लोकतन्त्रस्य वार्तां करोति। मुख्यमन्त्री प्रावोचत् यत् लोकतन्त्रस्य रक्षणस्य जनतायाश्च मताधिकारस्य वार्तां कर्तुं नैतिकम् अधिकारं केवलं काङ्ग्रेस-दलमेव धारयति।

देशे मुगलानां, नृपाणां, ब्रिटिशानां (आङ्ग्लशासकानां) च काले सामान्यजनतायै सर्वकारस्य चयनस्य अधिकारः नासीत्। बाबासाहेब- डॉ. भीमराव आम्बेडकर-महोदयस्य संविधानेन देशस्य स्वातन्त्र्यानन्तरमेव लोकतान्त्रिक- व्यवस्था सुदृढा जाता। अद्य जनता स्वमतेन पञ्चायतप्रतिनिधितः आरभ्य मुख्यमन्त्रिणः पर्यन्तं निर्वाचनं करोति। सः अस्याः व्यवस्थायाः श्रेयः काङ्ग्रेसदलस्य विचारधायै प्रददात्, भाजपादलस्य पदयात्रासु प्रश्नान् अपि उदभावयत्। पूर्वतन- भाजपा- सर्वकारस्य कार्यकाले प्रहारं कुर्वन् मुख्यमन्त्री प्रावोचत् यत् २०१७ तः २०२२ वर्षयोः अन्तराले प्रदेशे शिक्षायाः गुणवत्ता सप्तमे स्थाने प्राप्ता आसीत्, यदा तु वर्तमानसर्वकारस्य प्रयासैः हिमाचलः पञ्चमे स्थाने समागतः। सः अकथयत् यत् केवलं विद्यालयानाम् उद्घाटनेन शिक्षायाः गुणवत्ता न परिष्कृता न भवति, अस्यार्थं योग्यशिक्षकाणां नियुक्तिः अनिवार्या वर्तते।

जनकराजम् अभिलक्ष्य व्यङ्ग्यम्, हिमकेयर-योजनायां भ्रष्टाचाराक्षेपाः

मुख्यमन्त्री अवदत् यत् काङ्ग्रेससर्वकारेण कर्मचारिभ्यः पुरातन- निवृत्तिवेतन- योजनां पुनस्संस्थाप्य तेषां वार्धक्यस्य आधारः प्रदत्तः। सः केन्द्रसर्वकारम् उपरि राजस्व-न्यूनता-अनुदानं स्थगयित्वा प्रदेशस्य आर्थिककठिनतायाः वर्धनस्य आरोपम् अकरोत्। सः प्रावोचत् यत् सर्वकारः परिमितसंसाधनानां मध्येऽपि अनाथबालेभ्यः सप्तविंशतिवर्षायुः (२७) यावत् साहाय्यं ददाति। अस्यान्तर्गततया तेभ्यः प्रतिमासं चतुस्सहस्ररूप्यकाणि (₹४,०००), गृहनिर्माणाय त्रिलक्षरूप्यकाणि (₹३,००,०००), विवाहाय च द्विलक्षरूप्यकाणि (₹२,००,०००) दीयमानानि सन्ति।



डॉ. जनकराजः वृत्तिं त्यक्त्वा निर्वाचनम् अस्पर्धयत्

मुख्यमन्त्रिणा प्रतिपादितं यत् डॉ. जनकराजः स्वकीयां सर्वकारीयसेवाम् उत्सृज्य निर्वाचनम् अयोधयत्, जियालालकपूरस्य च निर्वाचनपत्रं (टिकट) विलोपितवान्। पूर्वतन- भाजपा-सर्वकारस्य काले प्रारब्धां 'हिमकेयर' योजनां विषयीकृत्य प्रश्नान् उत्थापयन् सः आरोपम् अकरोत् यत् योजनान्तर्गततया पुरुषाणां गर्भाशय-शस्त्रक्रियापर्यन्तं धनादेशपत्राणि निर्मितानि। सः अवदत् यत् तस्मिन् काले चिकित्सालयेषु उत्तरदायित्वपूर्णपदेषु उपविष्टैः अधिकारिभिः तादृशेषु भ्रष्टाचारितेषु कार्येषु दृष्टिः स्थापनीया आसीत्। मुख्यमन्त्री जनप्रतिविधिभ्यः उपदिशन् अवदत् यत् तैः होली-उतरालामार्गस्य, भरमौर-चिकित्सालये वैद्यानां न्यूनतायाः सदृशानि स्थानीयप्रकरणानि विधानसभायां प्रमुखतया उत्थापनीयानि।

भरमौर-क्षेत्रस्य सप्तविंशति-पञ्चायतेभ्यः जनजानीय-पदवीप्राप्तेः आशा उद्भूता

भरमौर- विधानसभाक्षेत्रस्य अजनजातीय-पदवीयुतानां सप्तविंशतेः (२७) पञ्चायतानां कृते जनजातीयक्षेत्रस्य मर्यादां (पदवीं) प्राप्तुम् आशा उद्भूता। मुख्यमन्त्रीमहोदयः एतां याचनां गम्भीरतया स्वीकृत्य समित्याः सङ्घटनस्य विषयं च केन्द्रसर्वकारस्य समक्षम् उपस्थापयितुम् आश्वासनं दत्तवान्। एतासां पञ्चायतानां प्रायः चतुश्चत्वारिंशत्सहस्रं (४४,०००) यावत् जनसङ्ख्या दीर्घकालात् जनजातीय- मर्यादायाः याचनां कुर्वती अस्ति। स्थानिक- निवासिनां कमल ठाकुरस्य, राजीव कुमारस्य, नरेशकुमारस्य, रविन्द्रकुमारस्य च कथनम् अस्ति यत् तेषां भाषा, संस्कृतिः, खानपानं, जीवनपद्धतिश्च भरमौर-जनजातीयक्षेत्रेण सह साम्यं भजन्ति, किन्तु प्रशासनिकदृष्ट्या ते अजनजातीयक्षेत्रे स्थापिताः सन्ति। जनानां तर्कः अस्ति यत् ते भरमौर-विधानसभाक्षेत्रे मतदानं कुर्वन्ति, किन्तु जनजातीयक्षेत्रेभ्यः प्राप्यमाणाभ्यः सुविधाभ्यः अधिकारेभ्यश्च वञ्चिताः सन्ति। एतत् क्षेत्रेण सह भेदभावाचरणरूपेण परिदृश्यते।

जनजातीयपदवीं याचमानासु पञ्चायतेषु गुराड़, डुलाड़ा, किलोड़, कलमला, कुनेड़, राड़ी, भटवाड़ा, प्रीणा, गाण, बलोठ, खुन्दले, लेच, कूँर, छतराड़ी, प्यूहरा, गैहरा, ब्रेही, सुनारा, तागी, लोथल, बकाण, धिमला, बन्दला, फागड़ी, दाड़वी, मैहला, चड़ी च समाविष्टाः सन्ति। ग्रामीणैः निगदितं यत् पञ्चायतानां प्रायः पञ्चनवतिप्रतिशतं (९५%) ग्रामाः अद्यापि मार्गसुविधातः वञ्चिताः सन्ति। अनेन शिक्षां, स्वास्थ्यं, अन्याश्च मूलभूतसुविधाः प्राप्तुं जनाः महतीं कठिनताम् अनुभवन्ति। मण्डल-विपणन-समित्याः (मार्केट कमेटी) अध्यक्षेण ललितठाकुरेण लिल्ह-मध्ये आयोजितायां मुख्यमन्त्रिणः जनसभायाम् इयं याचना पुरतः प्रदर्शिता। मुख्यमन्त्रिणः पक्षतः समित्याः गठनस्य आश्वासनानन्तरं क्षेत्रवासिषु अस्याः याचनायाः पूर्त्यै नूतना आशा सञ्जाता।

उच्चन्यायालयेन स्पष्टीकृतम्- व्यक्तिगतातिथिशालासु ५०० मिलीलीटरमितजलकुपीनां प्रयोगे नास्ति प्रतिबन्धः



हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेश-उच्चन्यायालयेन स्पष्टीकृतं यत् राज्ये ५०० मिलीलीटर-परिमितस्य जलस्य 'पीईटी' प्लास्टिक-कूपिकानां प्रतिबन्धः केवलं सर्वकारीय- कार्यक्रमेषु सर्वकारीयातिथिशालासु च एव सीमितः वर्तते, न तु वैयक्तिक-आयोजनेषु। न्यायालयेन निगदितं यत् वैयक्तिक- अतिथिशालासु सामान्यजनतायै अथवा असर्वकारीय- कार्यक्रमेभ्यः एतासां कूपिकानाम् उपयोगे कश्चिदपि प्रतिबन्धः नास्ति। न्यायाधिपतेः अजयमोहनगोयलस्य न्यायाधिपतेः योगेश जसवालस्य च खण्डपीठेन 'मैसर्स साई मेट्रो सेल्स' इत्याख्यया संस्थया योजितायाः याचिकायाः श्रवणवेलायाम् इदं स्पष्टीकरणं प्रदत्तम्।

याचिकाकर्त्रा न्यायालये तर्कः उपस्थापितः यत् सर्वकारस्य २९ मार्च २०२५ दिनाङ्कस्य अधिसूचनायाः अनन्तरं वैयक्तिक-अतिथिशालास्वपि ५०० मिलीलीटर-परिमितस्य जलकूपीनां विक्रयणोपरि प्रतिबन्धः आरोप्यते, यद् अनुचितम् अस्ति। खण्डपीठेन अधिसूचनायाः अनुशीलनानन्तरं स्पष्टीकृतं यद् अयं प्रतिबन्धः केवलं सर्वकारीयविभागानां, मण्डलानां (बोर्ड), निगमानाम्, अन्य-राज्यसङ्घटनानां च आन्तरिक-आधिकारिक-उपवेशनेषु, सम्मेलनेषु, कार्यक्रमेषु, हिमाचलप्रदेश- पर्यटन- विकास- निगमस्य (HPTDC) अतिथिशालासु एव प्रवर्तते। यदि कश्चन सर्वकारीयविभागः कस्मिंश्चित् निजी अतिथिशालायां गोष्ठीं सम्मेलनं वा आयोजयति, तर्हि तत्र ५०० मिलीलीटर-परिमितपर्यन्तानां कूपिकानाम् उपयोगः प्रतिबन्धितः स्थास्यति।

यदि कस्मिंश्चित् वैयक्तिक-होटल-परिसरे कश्चन विवाहः, उत्सवः, असर्वकारीयः कार्यक्रमो वा प्रचलति, तर्हि तत्र एतासां कूपिकानां प्रयोगोपरि काऽपि बाधा नास्ति। सर्वकारेण न्यायालयस्य अस्मिन् विषये प्रारम्भावस्थायां सहमतिः प्रकटिता। यद्यपि तैः अस्य तथ्यस्य पुष्टिकरणार्थम् एकसप्ताहस्य समयः याचितः यत् किम् अस्याः अधिसूचनायाः अनन्तरं कोऽपि अपरः अनुपूरक-आदेशः तु न निर्गतः। न्यायालयेन महाधिवक्त्रे (एडवोकेट जनरल) अस्मिन् सन्दर्भे समुचितान् निर्देशान् सूचनाश्च सङ्गृहीतुं कथितम्। अस्य प्रकरणस्य अग्रिमा श्रवणक्रिया (सुनवाई) १९ नवम्बरदिनाङ्के भविष्यति

भरमौर-क्षेत्राय मुख्यमन्त्रिणः महदोपहारः पञ्चसु स्थानेषु उद्घाटिष्यन्ते सीबीएसई-विद्यालयाः, होली- उत्तराला-मार्गाय १८ कोटिरूप्यकाणि

हिमसंस्कृतवार्ताः- चम्बा। मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः प्रावोचत् यत् वर्तमान-काङ्ग्रेससर्वकारस्य कार्यकाले समाजस्य सर्वेषां वर्गाणां प्रदेशस्य च सर्वेषां क्षेत्राणाम् अभूतपूर्वः विकासः सञ्जातः। व्यवस्थापरिवर्तनस्य कटिबद्धतया सह प्रदेशसर्वकारेण अनाथबालानां, विधवानां एकल- महिलानां, कृषकाणां, फलोत्पादकानां, यूनां च कल्याणार्थम् अनेकाः योजनाः विरच्य ताः भूतले (धरातले) प्रवर्तिताः, येन तेषां जीवने सकारात्मकं परिवर्तनं दृष्टम्।

मुख्यमन्त्रिणा चम्बा-मण्डलस्थस्य भरमौर-विधानसभाक्षेत्रस्य लिह्ल-कोठीस्थाने एकां विशालजनसभां सम्बोधयता कथितं यत् प्रदेशस्य इतिहासे इदं प्रथमवारं वर्तते यत् केनचित् सर्वकारेण ग्रामीणार्थव्यवस्थायाः सुदृढीकरणस्य उद्देश्येन विशिष्टः दृष्टिकोणः स्वीकृतः। व्यवस्था-परिवर्तनस्य माध्यमेन प्रदेशसर्वकारेण कृषौ, फलोत्पादने, पशुपालने, मत्स्यपालने ग्रामीणक्षेत्रेषु च स्वजीविकायाः प्रोत्साहनाय नूतनाः उपक्रमाः प्रारब्धाः। एतेषां प्रयासानाम् उद्देश्यं ग्रामीणार्थव्यवस्थां सुदृढां विधातुं ग्रामीणक्षेत्रेषु च जनानाम् आजीविकासाधनेभ्यः बलं प्रदातुम् अस्ति।

मुख्यमन्त्री सुक्खूः अवदत् यत् तस्य मुख्यमन्त्रित्वपदग्रहणात् षण्मासानन्तरमेव प्रदेशेन भीषणस्य प्राकृतिकापदो सम्मुखीकरणं कृतं, किन्तु केन्द्रसर्वकारात् किमपि साहाय्यं न सम्प्राप्तम्। प्रदेशसर्वकारेण अभिलेखसमये (रिकॉर्ड- समय) राज्ये सञ्जातान् पञ्चसप्ततिसहस्राद् (७५,०००) अधिकान् पर्यटकान् सुरक्षितान् तेषां गृहाणि प्रापितम्, सहैव विद्युतः पेयजलापूर्तेश्च पुनर्स्थापना कृता। गम्भीरापदः मध्ये प्रधानमन्त्रिणा राज्याय १५०० कोटिरूप्यकाणां प्रदानस्य घोषणा कृता, यानि अद्यापि न प्राप्तानि। प्रदेश-भाजपा-नेतृभ्यः अपि कोऽपि सहयोगः न लब्धः। राज्यसर्वकारेण स्वकीयसंसाधनेभ्यः प्रभावान्वितपरिवारेभ्यः विशेष-उपशम-सञ्चयः प्रदत्तः, यस्मिन् नियमेषु परिवर्तनं विधाय पूर्णरूपेण विनष्टानां गृहाणां पुनर्निर्माणाय आर्थिकसाहाय्यं १.५० लक्षात् संवर्ध्य ८.५० लक्षाणि रूप्यकाणि कृतम्। प्रदेशसर्वकारेण कृतं कार्यं विश्ववित्तकोषेण नीत्यायोगेन च अपि प्रशंसितम्।

मुख्यमन्त्री अवदत् यत् प्राकृतिकापदा सहैव राज्यसर्वकारेण राजनैतिकसङ्कटस्य अपि सम्मुखीकरणं कर्तव्यम् अभवत्, यदा भाजपादलेन काङ्ग्रेसदलस्य काँश्चन विधायकान् चोरयित्वा जनभावनाभिः सह क्रीडितम्। मुख्यमन्त्रिणा वर्तमाने प्रचलन्त्यां भाजपा-दलस्य पदयात्रायां प्रश्नमुत्थापयता उक्तं यत् मतचौर्यं कृतवद्भ्यः अस्य कोऽपि अधिकारः नास्ति। पदयात्रायाः यथार्थम् अधिकारि काङ्ग्रेस-दलमेव वर्तते, येन संविधानेन देशस्य जनसामान्याय लोकतन्त्रस्य अधिकारः मतस्य च शक्तिः प्रदत्ता।

मुख्यमन्त्री सुक्खूः शिक्षाक्षेत्रे वर्तमानसर्वकारस्य उपलब्धीः संस्मरन् प्रावोचत् यत् गुणवत्तापूर्णशिक्षाप्रदाने अद्य हिमाचलप्रदेशः देशे पञ्चमे स्थाने वर्तते, किन्तु भाजपा-दलेन वक्तव्यं यत् तेषां सर्वकारस्य कार्यकाले कथम् एकविंशतितमे (२१) स्थाने पतितः आसीत्। पूर्वतनसर्वकारस्य काले ईदृशाः परिस्थितयः आसन् यत् पञ्चमकक्ष्यायाः छात्रः द्वितीयायाः कक्षायाः पुस्तकं पठितुम् अपि असमर्थः आसीत्। सः अवदत् यत् ग्रामीणक्षेत्राणां बालकेभ्यः श्रेष्ठतरशिक्षायाः अवसराः लभ्येरन् तथा च सीबीएसई- राज्य-विद्यामण्डलयोः मध्ये कोऽपि भेदो न स्यात्, अस्मिन्नेवोद्देश्ये सीबीएसई- विद्यालयाः उद्घाट्यन्ते।

मुख्यमन्त्री प्रावोचत् यत् केन्द्रसर्वकारात् सहयोगस्याभावेऽपि प्रदेशसर्वकारः स्वसंसाधनानि निरन्तरं वर्धयन् अस्ति। अयं प्रथमः सर्वकारः अस्ति यः प्रदेशस्य हितानां रक्षणार्थं विधिक-सङ्घर्षं कुर्वन् अस्ति। वयं बहुषु प्रकरणेषु विजयं लब्धवन्तः येन राज्याय सहस्रशः कोटिरूप्यकाणाम् आयः भविष्यति। किशाऊ-बहुद्देश्यीय-परियोजनायां राज्यसर्वकारेण स्वसमयैः सहमतिपत्रे हस्ताक्षरं कृत्वा ३००० कोटिरूप्यकाणां रक्षणे साफल्यं प्राप्तम्, अधुना च अस्याः परियोजनायाः सम्पूर्णावस्थायां २०३२ तमे वर्षे राज्यस्य कोषागारे १५०० कोटिरूप्यकाणि आगमिष्यन्ति। सः अवदत् यत् शिमलायाः 'वाइल्ड फ्लावर हॉल' प्रकरणे अपि सर्वोच्चन्यायालयेन प्रदेशसर्वकारस्य पक्षे निर्णयः श्रावितः, येन ४०१ कोटिरूप्यकाणाम् आयः जातः, त्रिंशत्सु वर्षेषु १२०० कोटिरूप्यकाणाम् आयः भविष्यति। मुख्यमन्त्री अकथयत् यत् सः सामान्यपरिवारात् मुख्यमन्त्रिपदं प्राप्तवान्, जनानां च दुःखं भृशम् अवगच्छति। अत एव सर्वकारेण ईदृश्यः योजनाः भूतले प्रवर्तिताः याभिः समाजस्य सर्वे वर्गाः लाभान्विताः भवेयुः प्रदेशश्च स्वावलम्बनस्य मार्गे अग्रे सरेत्। समाजस्य दुर्बलवर्गाणां प्रति संवेदनशीलदृष्टिकोणं धृत्वा राज्यसर्वकारेण 'मुख्यमन्त्री सुख-आश्रय-योजनायाः' अन्तर्गततया सप्तविंशतिवर्षायुः (२७) यावत् षट्-सहस्र- अनाथबालानां शिक्षा, स्वास्थ्यं, पाकेट-व्यय-वहनं च विधानेन सह गृहनिर्माणाय विवाहाय च आर्थिकसाहाय्यं दीयते। तथैव 'मुख्यमन्त्री सुख- शिक्षा- योजनायाः' अन्तर्गततया विधवास्त्रीणां बालानां व्यावसायिकशिक्षायाः व्ययमपि सर्वकारः वहति। सः प्रावोचत् यत् प्रदेशसर्वकारः शीघ्रमेव 'मुख्यमन्त्री स्वपरिवारः सुखीपरिवारः योजना' प्रारब्धुं गच्छति, यस्यान्तर्गततया प्रदेशे पञ्चसप्ततिसहस्रात् (₹७५,०००) न्यूनवार्षिकायानां त्रिलक्षाधिकपरिवाराणां २१ तः ५९ वर्षायुर्वर्गस्य महिलाभ्यः १५००-१५०० रूप्यकाणि, ३०० मात्राकाणि (यूनिट) निःशुल्कविद्युतः, दशलक्षरूप्यकाणां (₹१० लक्ष) च स्वास्थ्यबीमासुविधा प्रदास्यते।

चतुर्षु औद्योगिक-वाटिकासु त्रिंशत्सहस्रं (३०,०००) युनः लप्स्यन्ते जीविकाम्, सविस्तर-परियोजना-प्रतिवेदनं (DPR) केन्द्रसर्वकाराय प्रेषितम्




हिमसंस्कृतवार्ताः- शिमला।


हिमाचलप्रदेशे प्रस्तावितेभ्यः चतुर्भ्यः नूतनेभ्यः औद्योगिक-वाटिकाभ्यः प्रायः त्रिंशत्सहस्र- युवकेभ्यः (३०,०००) जीविकायाः अवसराः समुत्पत्स्यन्ते। उद्योगविभागेन 'भारत- औद्योगिक- विकास-योजना' (भव्य) इत्याख्यायाः अन्तर्गततया नालागढ़क्षेत्रे ऊना-मण्डलस्य टाहलीवाल-क्षेत्रे च निर्मीयमाणयोः द्वयोः औद्योगिक-वाटिकयोः सविस्तर- परियोजना-प्रतिवेदनं (डीपीआर) केन्द्रसर्वकाराय प्रेषितम्। उभयोः परियोजनयोः प्रायः चतुस्त्रिंशदधिक-द्विशतकोटि (२३४ कोटि) रूप्यकाणां व्ययानुमानं वर्तते। केन्द्रसर्वकारतः दिसम्बर २०२७ पर्यन्तं 'डीपीआर'-प्रतिवेदनाय अनुमोदनस्य (स्वीकृतेः) सङ्केताः प्राप्ताः सन्ति। उद्योगविभागस्य अधिकारिभिः केन्द्रसर्वकारपक्षतः याचिताः औपचारिकताः सम्पूर्णीकृत्य देहल्यां सम्बद्धानि अभिलेखपत्राणि समर्पितानि। प्रस्तावस्यानुसारेण नालागढ़स्य मंझोली-औद्योगिकक्षेत्रे प्रायः सार्धशतैकड़ (१५० एकड़) भूमौ चतुःपञ्चाशदधिक-शतकोटि (१५४ कोटि) रूप्यकाणां व्ययेन औद्योगिक-उद्यानं विकासयिष्यते। अपरत्र ऊनामण्डलस्य टाहलीवालक्षेत्रे पञ्चसप्तति-एकड़ (७५ एकड़) भूमौ अशीतिकोटि (८० कोटि) रूप्यकाणि व्ययीकृत्य उद्यानम् उत्पादयिष्यते।

औद्योगिक-वाटिकानां विकासार्थं सज्जता

एतदतिरिच्य काङ्गड़ा-मण्डलस्य कद्रोड़ी-क्षेत्रे सोलन-मण्डलस्य च कण्डाघाट-क्षेत्रे अपि औद्योगिक-उद्यानयोः विकासार्थं सज्जता वर्तते। एतयोः द्वयोः स्थानयोः कृते उद्योगविभागः प्रस्तावं सज्जीकुर्वन् अस्ति। समग्रदेशे 'भव्य'-योजनायाः अन्तर्गततया १०० औद्योगिक-वाटिकाः विकासनीयाः सन्ति, येषु हिमाचलप्रदेशस्य चतस्रः वाटिकाः समाविष्टाः वर्तन्ते। योजनायाः अन्तर्गततया केन्द्रसर्वकारः स्वीकृतेभ्यः औद्योगिक- उद्यान-परियोजनाभ्यः प्रति-एकरम् एककोटिरूप्यकाणि यावत् केन्द्रीय-साहाय्यं प्रदास्यति। राज्यसर्वकारस्य आशा वर्तते यद् एतेषाम् वाटिकानां विकासेन औद्योगिक- मूलभूतसंरचना (इन्फ्रास्ट्रक्चर) सुदृढा भविष्यति तथा च नूतन-निवेशेन सह स्थानिक-युवकेभ्यः वृत्ति-जीविका-अवसराः समेधिष्यन्ते। उद्योगमन्त्री हर्षवर्धनचौहानः प्रावोचत् यद् औद्योगिक- उद्यान- परियोजनानां स्वीकृतये द्वौ प्रस्तावौ केन्द्रसर्वकाराय प्रेषितौ स्तः। अस्मिन् सन्दर्भे उद्योगविभागस्य अधिकारिणां केन्द्रीय-मन्त्रालयस्य अधिकारिभिः सह गोष्ठी अपि सम्पन्ना वर्तते।

आईआईटी-मण्डी-संस्थानस्य शोधकार्यम्: मनाली-लेह-रेलवे-मार्गस्य पञ्च स्थानकाः प्राकृतिकआपदाक्षेत्रेषु, भवितुम् अर्हन्ति आह्वानम्





हिमसंस्कृतवार्ताः- मण्डी। मनाली- लेह-रेलमार्गः हिमालयस्य दुर्गमक्षेत्राणि संयोजयन् सामरिकदृष्ट्या पर्यटनदृष्ट्या च महत्त्वपूर्णः सिद्धो भवितुम् अर्हति, परम् अस्य निर्माणमार्गे प्रकृतेः आह्वानम् अपि न्यूनाः न सन्ति। तुङ्गपर्वताः, हिमनदाः (ग्लेशियर), हिमच्छादिता भूमिश्च, परिवर्धमाना जलवायुः च अस्य परियोजनायाः सुरक्षायाः कृते आह्वानं भवितुम् अर्हन्ति। आईआईटी- मण्डी- संस्थानस्य शोधकर्तारः अध्ययनेन अस्य रेलमार्गस्य निकटे तादृशानाम् अनेकेषां क्षेत्राणां चिह्नीकरणं कृतवन्तः, यत्र प्राकृतिकआपदानां विषये अधिकं सतर्कतायाः आवश्यकता वर्तते।

प्रस्तावित-रेल-मार्गस्य परितः २० किलोमीटर- परिमितस्य क्षेत्रस्य अध्ययनं कृतम्

अध्ययनानुसारम् रेलमार्गस्य मुक्तभागस्य १७.२१ किलोमिटरपरिमितं क्षेत्रम् उच्चसंवेदनशीलतायाः श्रेण्याम् अस्ति। तत्रैव पञ्च प्रस्तावितः रेलस्थानकाः अपि तादृशेषु क्षेत्रेषु स्थिताः सन्ति। आईआईटी-मण्डी-संस्थानस्य सिविल- एण्ड-इन्वार्नमेण्टल- इञ्जिनीयरिंग- विद्यालयालस्य कीर्तिकुमारमहान्तः, इप्शिताप्रियदर्शिनीप्रधानः, डॉ डेरिक्सप्रेजशुक्लाः च इदम् अध्ययनं कृतवन्तः। शोधपत्रं 'जियोडेसी एण्ड जियोडायनेमिक्स' इत्यत्र अंतर्जालमाध्यमेन प्रकाशितमस्ति। शोधकर्तारः प्रस्तावित-रेलमार्गस्य परितः २० किलोमीटर- परिमितस्य क्षेत्रस्य अध्ययनं कृतवन्तः।

कन्दरायुक्तभागे २७.५९ किलोमिटरपरिमितं क्षेत्रम् उच्चं, १०.०९ किलोमीटरपरिमितम् अति-उच्च- संवेदनशीलतायाः श्रेण्यां च।

अस्याः भूमेः तुङ्गत्वम्, ढालः, प्रस्तररचना, हिमनदानां हिमनद-सरोवराणां च दूरी, नदीनां भूगर्भीयदराराणां च स्थितयः इत्येतानि नव मानानि आधारीकृतानि। अस्य आधाराणि संवेदनशील- क्षेत्राणां मानचित्रं निर्मितम्। अध्ययने लगभग २७५.४३ किलोमिटर-दीर्घस्य रेलमार्गस्य मुक्त- कन्दरायुक्तानां भागानाम् आकलनं कृतम्। मुक्तभागे १७.२१ किलोमिटरपरिमितं क्षेत्रम् उच्चं, ५२.५५ किलोमीटरपरिमितं मध्यम- संवेदनशीलतायुक्तं प्राप्तम्। कन्दरायुक्ते भागे २७.५९ किलोमीटरपरिमितं क्षेत्रम् उच्चं १०.०९ किलोमीटरपरिमितम् अति-उच्चसंवेदनशीलतायाः श्रेण्यां स्थापितम् अस्ति।

अध्ययनं सम्भावित-सङ्कटाणां प्रति संवेदनशीलक्षेत्राणां करोति परिचयम्

शोधे प्रस्तावितेषुपञ्चदशसु रेलस्थानकेषु छुछोट, फे-यार्ड, देबरिंग, शे-रोड तथा दारचा इत्येतानि उच्चसंवेदनशीलतायुक्तेषु क्षेत्रेषु सम्मिलितानि सन्ति। तत्रैव कीलोंग, रुमत्से, करु, अपर-सरचू, पात्सियो, स्टकना इत्येतानि मध्यम-संवेदनशीलतायुक्तेषु क्षेत्रेषु सन्ति। उपशी तथा हेमिस अल्पसंवेदनशीलतायाः, सिस्सू-लेह-क्षेत्रे तु अति-अल्पसंवेदनशीलतायाः श्रेण्यां न्यस्ते स्तः। शोधकर्तृणाम् अनुसारं तापमाने परिवर्तनात् दीर्घकालात् आच्छादितायाः भूमेः विगलनेन भूमिपतनस्य पर्वतीयसतहानाम् अस्थिरतायाः च आशङ्का भवति। अध्ययने निर्माणपूर्वं संवेदनशीलक्षेत्राणां विस्तृतं भू-तकनीकीपरीक्षणं, आपदायाः निरीक्षणं, पूर्वचेतावनी-प्रणाल्याः च विकासस्य प्रस्तावः कृता अस्ति। शोधकर्तारः स्पष्टीकृतवन्तः यत् इदम् अध्ययनं सम्भावित- संकटाणां प्रति संवेदनशीलक्षेत्राणां परिचयं करोति, न तु कस्यापि आपदानां निश्चितं भविष्यकथनम्।

लेह- मनाली-रेलवमार्गेदृशे बृहन्निर्माणकार्ये केवलं मार्गक्रमणम् एव पर्याप्तं नास्ति, अपि तु तस्य क्षेत्रस्य भौगोलिक- प्राकृतिकपरिस्थितीनाम् अवगमनम् अपि आवश्यकं वर्तते। पर्माफ्रॉस्ट, हिमनदाः अस्थिरपर्वतीयढालदाः च सम्बद्धानां सम्भावित- संकटाणां पूर्वम् एव आकलनं करणीयम्। समये सति पर्यवेक्षणम् , पूर्वाहनम्, शीतपर्वतीयक्षेत्रानुकूल- निर्माणप्रयुक्तीनां च ग्रहणेन रेलमार्गस्य सुरक्षा सुदृढा कर्तुं शक्यते।

-डॉ डेरिक्स प्रेज शुक्ला,
प्रोफेसर, आईआईटी-मण्डी

चन्द्रबदनीपरिसरस्य नवनियुक्तप्रभारीप्राचार्येण डॉ. मूलचन्द्रशुक्लेन समितीनां कार्यप्रगतेः समीक्षा कृता





हिमसंस्कृतवार्ताः- डॉ. अभिषेक पाण्डेयः, चन्द्रबदनी (नैखरी), टिहरीगढ़वालम्। श्रीदेवसुमन- उत्तराखण्ड- विश्वविद्यालय-चन्द्रबदनीपरिसरे नैखरीस्थाने संस्कृतविभागाध्यक्षः असिस्टेंट प्रोफेसरः डॉ. मूलचन्द्रशुक्लः नवीनप्रभारी- प्राचार्यरूपेण नियुक्तः। उत्तराखण्डस्य उच्चशिक्षानिदेशालयेन वरिष्ठताक्रमानुसारं पूर्वप्राचार्यस्य डॉ. महन्थमौर्यस्य सेवानिवृत्त्यनन्तरम् एतद् दायित्वं तस्मै समर्पितम्। एतेन परिसरस्य प्रशासनिकनेतृत्वे निरन्तरता सुनिश्चिताभवत्। डॉ. मूलचन्द्रशुक्लस्य प्रशासनिकानुभवः पूर्वस्मादपि समृद्धो वरीवर्ति। तेन पूर्वं चमोलीजनपदस्थ - घाटस्थिते राजकीयमहाविद्यालये प्रभारीप्राचार्यरूपेण दायित्वं कुशलतया निर्व्यूढम्। अनन्तरं तस्य स्थानान्तरणं रामनगरस्थे राजकीयमहाविद्यालये अभवत्। शैक्षणिकानुभवेन प्रशासनिकदक्षतया च समन्वितं तस्य व्यक्तित्वं परिसरस्य भाविविकासाय महत्त्वपूर्णं भविष्यतीति अपेक्षा प्रकटिता।

नूतनदायित्वग्रहणानन्तरं डॉ. शुक्लेन आयोजिते समितिसम्बद्धे समीक्षोपवेशने परिसरस्य शैक्षणिक-प्रशासनिकगतिविधीनां सुव्यवस्थितसञ्चालनाय विविधाः कार्यदिशः समुपस्थापिताः। स्वकीयविचारान् अभिव्यञ्जयता तेन कथितं यत् परिसरस्य शैक्षणिकप्रगतिः, अनुशासनव्यवस्था, विविधशैक्षणिकक्रियाकलापाः, प्रशासनिक-कार्यक्षमता, विद्यार्थिनां सर्वाङ्गीणविकासः, विभागानां परस्परसमन्वयः तस्य प्राथमिकतासु अन्तर्भवन्ति। सर्वेषां विभागानां समितीनां च सक्रियसहभागितया परिसरस्य विकासयात्रां गतिमतीं प्रभावपूर्णां च कर्तुं तस्य विशेषः सङ्कल्पः अस्ति। संस्कृतविषयस्य दीर्घानुभवः शैक्षणिकक्षेत्रे नूतनां दिशं प्रदास्यतीति विश्वासः व्यक्तः। अस्मिन्नवसरे परिसरस्य प्राध्यापकाः कर्मचारिवर्गश्च नवनियुक्तप्रभारीप्राचार्यं हार्दिकाभिनन्दनैः शुभकामनाभिश्च समभिनन्दितवन्तः। तेषां नेतृत्वे परिसरः शैक्षणिकगुणवत्तायाः, अनुशासनस्य, संस्थागतसमन्वयस्य च क्षेत्रेषु निरन्तरम् उन्नतिपथम् आरूढः भविष्यतीति आशाविश्वासौ प्रकटितौ। तदनन्तरं प्रभारीप्राचार्येण डॉ. मूलचन्द्रशुक्लेन परिसरस्य विविधसमितीनां कार्यकलापानां प्रगतेश्च समीक्षार्थं विशेषोपवेशनम् आयोजितम्। उपवेशने समितीनां संयोजकैः सदस्यैश्च स्वकीयसमितीनां कार्यप्रगतेः विस्तृतविवरणं प्रस्तुतम्। प्रभारीप्राचार्येण निर्धारितदायित्वानां समयबद्धतया, उत्तरदायित्वपूर्णतया, प्रभावकारितया च निर्वहणाय विशेषबलं प्रदत्तम्। सर्वाभिः समितिभिः परस्परं समन्वयं संस्थाप्य परिसरस्य शैक्षणिक-प्रशासनिक- गतिविधयः सुव्यवस्थितरूपेण सञ्चालनीयाः इति तेन आहूतम्।

नूतननेतृत्वस्य समन्वयात्मकदृष्ट्या, कार्यनिष्ठया, विकासोन्मुखचिन्तनेन च चन्द्रबदनीपरिसरः शैक्षणिकसमृद्धेः नवीनमायाम् अधिगमिष्यतीति परिसरपरिवारस्य विश्वासः वर्तते।

दीर्घायुः-२०२६ राष्ट्रियसङ्गोष्ठ्यां वृद्धजनानां परिचर्यायां कृत्रिमबुद्धिमत्तायाः उपयोगविषये विशेषव्याख्यानम्






हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः। गोरखपुरस्थे महायोगीगोरखनाथविश्वविद्यालयस्य गुरु गोरक्षनाथ आयुर्विज्ञानसंस्थाने आयोजितायां 'दीर्घायुः- २०२६' राष्ट्रियसङ्गोष्ठ्यां चतुर्थे तकनीकीसत्रे वृद्धजनानां स्वास्थ्यपरिचर्यायां कृत्रिमबुद्धिमत्तायाः उपयोगविषये विशेषव्याख्यानम् अभवत्। अस्मिन् सत्रे एम. पी. बिरला समूहस्य चिकित्सालयानां चिकित्सानिदेशकः डॉ. सञ्जयमहेश्वरी महोदयः आधुनिकप्रौद्योगिक्याः माध्यमेन वृद्धजनानां स्वास्थ्यनिरीक्षणस्य, रोगाणां पूर्वपरिचयस्य तथा गुणवत्तापूर्णचिकित्सायाः सम्भावनाः विवृतवान्। तेन प्रतिपादितं यत् कृत्रिमबुद्धिमत्ता चिकित्सकानां विकल्पः न, अपितु तेषां कार्यक्षमतां वर्धयितुं सहायकसाधनम् अस्ति। अस्याः उपयोगेन स्वास्थ्यसेवाः अधिकाः सुलभाः प्रभावपूर्णाः च भवितुम् अर्हन्ति। सत्रस्य अध्यक्षता डॉ. एम. श्रीनिवासुलु महोदयेन कृता। डॉ. सन्ध्या पाठकः, डॉ. विजिषा च सहाध्यक्षत्वेन एवं सञ्चालनदायित्वेन योगदानम् अददाताम्। अनेके शिक्षकाः, चिकित्सकाः, शोधार्थिनः छात्राश्च अस्मिन् सत्रे उपस्थिताः आसन्। चतुर्थसत्रानन्तरं संस्थाने त्रयः समानान्तराः वैज्ञानिकसत्राः आयोजिताः। तेषु प्राध्यापकाः, स्नातकोत्तरविद्यार्थिनः अन्ये च छात्राः शोधविषयान् प्रस्तुतवन्तः। वृद्धावस्था-चिकित्सायां कृत्रिमबुद्धिमत्तायाः उपयोगविषये विशेषचर्चा अभवत्। समग्रतः एतत् सत्रं वृद्धजनानां स्वास्थ्यसेवायां आधुनिकप्रौद्योगिक्याः महत्त्वं प्रकाशयत्।

"महाभाष्यकार पतञ्जले परिचयम्"

"योगेन चित्तस्य पदेन वाचां, मलं शरीरस्य च वैद्यकेन

योऽपाकरोत्तं प्रवरं मुनीनां, पतञ्जलिं प्राञ्जलिरानतोऽस्मि।।





हिमसंस्कृतवार्ता
डॉ. वर्षा प्रकाश टोणगांवकर
लेखिका, पुणे (महाराष्ट्रम्)

महामुनि पतञ्जलिविषये उक्तं पद्यमिदं सुप्रसिद्धमस्ति यत् अनेन मुनिना योगशास्त्रे, व्याकरणशास्त्रे, वैद्यकशास्त्रे च ग्रन्थरचना अकुर्वन्। अयं पाणिनीय- व्याकरणमाश्रित्य महद्व्याख्यानं लिपिबद्धं चकार, यत् विपश्चितचेतांसि चमत्करोति। नीरसमपि व्याकरणशास्त्रं स्वकीयया अभिनव व्याख्याया सुतरां सरसाञ्चकार। महामुनिना पतञ्जलिना महाभाष्ये सूत्रवार्तिकयोरपूर्तिः [शेषः] परिपूर्तिमानीतेत्यस्माद् हेतोः स पदशेषकारतया संबोधितः। पदशेषकारकात्वात् तदीयमाभिधानं शेषः, नागनाथः, अहिपतिः प्रसिद्धमिति। भगवतः पतञ्जलेः शेषावतारत्वम् इति प्रसिद्धम्।

महाभाष्यकारस्य पतञ्जलेः शैली वैदर्भीरीतिरस्ति, यस्याः स्वरुपम् अधोलिखितमस्ति-

"अकठोराक्षरं स्वल्पसमासं चूर्णकं विदुः।
तत्तु वैदर्भरीतिस्थं गद्यं ह्यद्यतरं भवेत्।"

इत्थं व्याकरणसदृशो जटिलो नीरसश्च विषयो ह्यद्यतरेण चूर्णकाख्य गद्येन सरसीकृतो भगवता पतञ्जलिना।

सिद्धार्थनगरे स्वास्थ्यविभागस्य समीक्षागोष्ठी, असावधानीकर्तॄन् प्रति जिलाधिकारी कठोरः



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, सिद्धार्थनगरम्। जनपदे स्वास्थ्यसेवासु असावधानीं प्रति जिलाधिकारी शिवशरणप्पा जी. एन. कठोरताम् अवलम्बितवान्। बुधवासरे जिलाधीश कार्यालयस्य सभागारे आयोजितायां स्वास्थ्यविभागस्य समीक्षागोष्ठ्यां सः प्रत्येकस्याः गर्भवत्याः संस्थागतप्रसवं सुनिश्चितं कर्तुं निर्देशम् अददात्। गृहे प्रसवे सति सम्बन्धितस्य सामुदायिक- स्वास्थ्यकेन्द्रस्य प्रभारीचिकित्सकः (एमओआईसी) उत्तरदायी भविष्यति इति स्पष्टमकरोत्। जिलाधिकारी ७० वर्षाधिकवयस्कानाम् आयुष्मान् कार्डनिर्माणकार्ये आङ्गनवाडिकार्यकर्तॄणाम् आशाकार्यकर्तॄणां च सहयोगेन गतिवर्धनाय निर्दिष्टवान्। जननीसुरक्षायोजनायाः लाभार्थिनां पञ्जीकरणं प्रोत्साहनराशेः वितरणं च शीघ्रं सुनिश्चितं कर्तुम् आदिष्टवान्।

एनबीएसयू- एसएनसीयू- केन्द्राणि अहर्निशं सञ्चालयितुम्, उच्चसंकटयुक्तगर्भवतीनां विशेषनिरीक्षणं कर्तुं, क्षयरोगिणां चिह्नीकरणं परीक्षणं चिकित्सां च सुनिश्चितं कर्तुं निर्देशं दत्तवान्। आयुष्मान् आरोग्यमन्दिराणि समये उद्घाटयितुम्, उच्चरक्तचाप- मधुमेहरोगिणां नियमितपरीक्षणं, ई-सञ्जीवनीसेवायाः विस्तारं कर्तुमपि निर्दिष्टवान्।

डेङ्गू- मलेरिया- इन्सेफेलाइटिस- प्रभृतिरोगाणां नियन्त्रणाय स्वच्छतां लारवानाशकौषधीनां च प्रसारणं प्रभावीरूपेण कर्तुं निर्दिष्टवान्। रोगिभ्यः अनावश्यककष्टं न दातव्यं, बहिः क्रयणाय औषधानि अपि न लेखनीयानि इति चेतावनीम् अददात्कर्तृभ्यः स्वास्थ्यकर्मिभ्यः कारणदर्शक-सूचनापत्रं प्रेषयितुमपि निर्देशः दत्तः। गोष्ठ्यां मुख्यविकासाधिकारी बलरामसिंहः, मुख्यचिकित्साधिकारी डॉ. सञ्जयकुमारदोहरे, सर्वे एमओआईसी-अधिकारिणः अन्ये स्वास्थ्यकर्मिणश्च उपस्थिताः आसन्।

अयोध्यायां दशमः दीपोत्सवः- सज्जताः अन्तिमचरणे



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, अयोध्या। श्रीरामनगरे अयोध्यायां दशमस्य भव्यदीपोत्सवस्य सज्जताः अन्तिमचरणं प्राप्ताः। अस्मिन् वर्षे रामकीपैडीतटे स्थितेषु ५६ घाटेषु त्रिंशत् लक्षं दीपाः स्थापितुं प्रापिताः सन्ति। सम्पूर्णा अयोध्यानगरी विद्युद्दीपैः, आकर्षकैः स्वागतद्वारैः च सुसज्जिता अस्ति। दीपोत्सवस्य प्रमुखाकर्षणस्य लेजर- मल्टीमीडिया- प्रदर्शनस्य परीक्षणमपि प्रारब्धम्। अस्मिन् प्रदर्शने आधुनिकप्रौद्योगिक्या श्रीरामस्य जीवनप्रसङ्गाः रामायणस्य च दृश्यानि प्रदर्शयिष्यन्ते। अस्मिन् वर्षे युवजनानां पर्यटकानां च आकर्षणाय नवीनानि दृश्यचित्राणि, सङ्गीतं, विशेषप्रभावाः च समायोजिताः सन्ति। सरयूनद्याः जले विशेषः चलमञ्चः अपि निर्मीयते, यत्र कलाकाराः विविधाः आकर्षकाः प्रस्तुतयः करिष्यन्ति। नवम्बरमासस्य सप्तमे दिनाङ्के आयोज्यमानः अयं दीपोत्सवः अयोध्यायाः धार्मिकसांस्कृतिकवैभवं प्रकाशयिष्यति।



दीपावलीपर्वात् पूर्वं नवनियुक्तशिक्षकाणां वेतनभुगतानस्य निर्देशः

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, लखनऊ, नवम्बरमासः ५, २०२६।

उत्तरप्रदेशस्य माध्यमिक- शिक्षानिदेशकेन अशासकीय- सहायताप्राप्त- माध्यमिकविद्यालयेषु नवनियुक्तानां शिक्षकाणां वेतनभुगतानविषये महत्त्वपूर्णः निर्देशः निर्गतः।

निर्देशानुसारम् उत्तरप्रदेश- माध्यमिक-शिक्षासेवा- चयनायोगेन चयनितानां एल.टी. ग्रेड, प्रवक्ता, संस्थाप्रधान- प्रधानाचार्यपदानां नवनियुक्तानां अभ्यर्थिनां नियुक्तिपत्राणि निर्गत्य विद्यालयेषु नियुक्तिः कृता अस्ति। एतेषां नवनियुक्तशिक्षकाणां शैक्षणिकप्रमाणपत्राणां सत्यापनस्य दायित्वं सर्वेभ्यः जनपदीय-विद्यालयनिरीक्षकेभ्यः प्रदत्तम् अस्ति। प्रमाणपत्राणां सत्यापनप्रक्रियायां किञ्चित् समयः अपेक्षितः भवति। समीपस्थं दीपावलीपर्वं दृष्ट्वा शिक्षानिदेशकेन निर्देशः दत्तः यत् सर्वेषां नवनियुक्तशिक्षकाणां वेतनभुगतानं दीपावलीपर्वात् पूर्वं सुनिश्चितं क्रियताम्। यदि केषाञ्चित् नवनियुक्तशिक्षकाणां नियमितवेतनभुगतानम् अद्यापि प्रारब्धं नास्ति, तर्हि तेभ्यः शपथपत्रं गृहीत्वा वेतनभुगतानस्य व्यवस्था कर्तव्या। अनन्तरं शैक्षणिकप्रमाणपत्राणां सत्यापने काऽपि अनियमितता अथवा विसङ्गतिः प्राप्यते चेत् सम्बन्धितानां विरुद्धं विधिककार्यवाही, प्राथमिकी पञ्जीकरणं च करिष्यते। तेषां नियुक्तिः प्रारम्भादेव अमान्या इति मन्यते। राजकोषस्य क्षतेः पूर्तिः अपि सुनिश्चितीकरिष्यते। अतः सर्वेभ्यः जनपदीय-विद्यालय- निरीक्षकेभ्यः निर्देशः दत्तः यत् उपर्युक्तानां नियमानाम् अनुपालनं कुर्वन्तु, नवनियुक्तशिक्षकाणां च वेतनभुगतानं समये एव सुनिश्चितं कुर्वन्तु।

छठपूजापर्यन्तं निःशुल्का अल्ट्रासाउण्ड- अन्वेषणसेवा

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, सिद्धार्थनगरम्। छठपूजायाः पावनावसरे दिनेशसिंहस्मृति- चिकित्सालयस्य प्रबन्धकः डॉ. जितेन्द्रसिंहः प्रशंसनीयम् उपक्रमम् आरब्धवान्। तेन छठपूजापर्यन्तं चिकित्सालये निःशुल्का अल्ट्रासाउण्डसेवा प्रदातुं निर्णयः कृतः। अस्याः योजनायाः अन्तर्गतं विंशत्यधिकानां आवश्यकतावशात् आगतानां जनानां निःशुल्कं निरीक्षणं भविष्यति। आर्थिकसमस्यया ये जनाः आवश्यकां स्वास्थ्यनिरीक्षणं कर्तुं न शक्नुवन्ति, ते अस्याः सुविधायाः लाभं प्राप्स्यन्ति।

डॉ. जितेन्द्रसिंहः कोरोनाकाले अपि स्वजीवनस्य चिन्तां विना जनानां सेवायां निरतः आसीत्। सः निर्धनानां आवश्यकताग्रस्तानां च सहायतायै सदैव तत्परः भवति। अस्य मानवीयसेवाकार्यस्य सर्वत्र प्रशंसा भवति।

अयोध्यायां दीपोत्सवस्य कृते यातायात- व्यवस्थायां परिवर्तनम्

नवम्बरमासस्य षष्ठदिनाङ्कात् अष्टमदिनाङ्क-पर्यन्तं गुरुवाहनानां मार्गपरिवर्तनम्

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, लखनऊम्, ५ नवम्बर २०२६।

अयोध्यायां नवम्बरमासस्य सप्तमे दिनाङ्के दीपोत्सवस्य मुख्यः समारोहः आयोजयितुं प्रस्तावितः अस्ति। अस्य महोत्सवस्य दृष्ट्या जनसामान्यस्य सुरक्षायै तथा यातायातस्य सुचारुसञ्चालनाय लखनऊपुलिसस्य यातायात-पुलिसविभागेन विशेषा यातायातव्यवस्था प्रख्यापिता अस्ति।

एतदनुसारं नवम्बरमासस्य षष्ठदिनाङ्के रात्रौ द्वादशवादनात् आरभ्य अष्टमदिनाङ्के कार्यक्रमस्य समाप्तिपर्यन्तं आवश्यकतानुसारं गुरुवाहनानां मार्गपरिवर्तनं प्रतिबन्धश्च भविष्यति।

गुरुवाहनानां कृते वैकल्पिकमार्गाः

१. सीतापुरमार्गतः आगच्छन्तः गुरुवाहनानि- सीतापुरमार्गतः आगच्छन्तः बसयानानि, बृहद्वाहनानि, गुरुवाहनानि बाराबङ्की- अयोध्यादिशं गन्तुं न अनुमन्यन्ते। एतानि वाहनानि इन्दिराबागस्थितेन किसानपथस्य अधःमार्गेण किसानपथं प्राप्य सुलतानपुरमार्गेण (चाँदसराय) पूर्वाञ्चलद्रुतमार्गं गमिष्यन्ति।

२. हरदोईमार्गतः आगच्छन्तः गुरुवाहनाः- हरदोईमार्गतः आगच्छन्तः गुरुवाहनाः बाजपुरस्थितेन किसानपथस्य अधःमार्गेण किसानपथं प्राप्य सुलतानपुरमार्गेण (चाँदसराय) पूर्वाञ्चलद्रुतमार्गं प्रति प्रेषयिष्यन्ते।

३. आगरा-द्रुतमार्गतः आगच्छन्तः गुरुवाहनाः- आगरा-द्रुतमार्गतः आगच्छन्तः गुरुवाहनाः खुशहालगञ्जस्थितेन किसानपथस्य अधःमार्गेण किसानपथं प्राप्य सुलतानपुरमार्गेण (चाँदसराय) पूर्वाञ्चलद्रुतमार्गं गन्तुं शक्नुवन्ति।

४. कानपुरमार्गतः आगच्छन्तः गुरुवाहनाः- कानपुरमार्गतः आगच्छन्तः वाहनानि फतेहपुर-लालगञ्ज- बछरावाँ- हैदरगढ़मार्गेण पूर्वाञ्चलद्रुतमार्गं गन्तुं शक्नुवन्ति। अन्येन वैकल्पिकमार्गेण कानपुर- उन्नाव- बीघापुर/पुरवा- लालगञ्ज- मौरावाँ- बछरावाँ- हैदरगढ़मार्गेण अपि गन्तव्यस्थानं प्राप्तुं शक्यते।

कानपुरदिशः आगच्छन्तः बसयानानि तथा गुरुवाहनानि बाराबङ्की-अयोध्यादिशं गन्तुं प्रतिबन्धितानि भविष्यन्ति। एतानि दारोगाखेड़ास्थितेन किसानपथस्य अधःमार्गेण किसानपथं प्राप्य सुलतानपुरमार्गेण पूर्वाञ्चलद्रुतमार्गं गमिष्यन्ति।

आपत्कालीनवाहनानां कृते विशेषानुमतिः-

सामान्ययातायाताय निर्धारितमार्गेषु परिवर्तनं भविष्यति। तथापि चिकित्सकीय-आपत्कालीनस्थितौ अन्यस्य मार्गस्य अभावे एम्बुलेन्सयानानि, विद्यालययानानि, अग्निशमनयानानि, शववाहनानि यातायातपुलिसस्य स्थानीयपुलिसस्य च अनुमत्या प्रतिबन्धितमार्गेषु अपि गन्तुं शक्नुवन्ति।

जनसामान्याय आह्वानम्-

यातायातपुलिसविभागेन सर्वेभ्यः वाहनचालकेभ्यः नागरिकेभ्यश्च अनुरोधः कृतः यत् ते निर्धारित-यातायात- नियमाणाम् अनुपालनं कुर्वन्तु तथा वैकल्पिकमार्गाणाम् उपयोगं कुर्वन्तु। विशेषसहायतायै अथवा यातायात-सम्बन्धितसूचनायै नागरिकाः ९४५४४०५१५५ इति यातायातनियन्त्रणकक्षस्य दूरभाषसङ्ख्यायां सम्पर्कं कर्तुं शक्नुवन्ति। दीपोत्सवस्य सफलायोजनाय जनसहयोगः अत्यन्तम् आवश्यकः अस्ति।

- यातायातपुलिसविभागः, लखनऊम्।

मिल्लत-महाविद्यालयस्य दरभंगा-नगरे आयोजिता राष्ट्रीयसंगोष्ठी



हिमसंस्कृतवार्ताः- विश्व मोहन झा, दरभंगा।

मिल्लत- महाविद्यालयस्य, दरभंगा, ललित- नारायण- मिथिला-विश्वविद्यालयस्य स्नातकोत्तर- दर्शनशास्त्र- विभागस्य च संयुक्तत्त्वावधाने "मैत्रेयी- याज्ञवल्क्ययोः संवादः, आत्मा, अमरत्वं ब्रह्मज्ञानं च- एकं दार्शनिकं विश्लेषणम्" (मैत्रेयी और याज्ञवल्क्य का संवादः आत्मा, अमरत्व एवं ब्रह्मज्ञान का दार्शनिक विश्लेषण) विषये एकः राष्ट्रीय- संगोष्ठ्याः आयोजनं प्रधानाचार्यस्य डॉ. राजीवकुमारस्य अध्यक्षतायां कृतम्।

संगोष्ठ्याः अध्यक्षीयसम्बोधने सः विषयस्य अकादमिक- दार्शनिक- महत्त्वं प्रकाशयन् अवदत् यत् भारतीयदर्शनस्य समृद्धपरम्परायां उपनिषदानां विशिष्टं स्थानम् अस्ति, मैत्रेयी- याज्ञवल्क्ययोः च संवादः अद्यापि मानवजीवनस्य मूलभूतप्रश्नानां समाधानं अन्वेषितुम् प्रासंगिकः अस्ति। सः अवदत् यत् उच्चशिक्षायै शोधपरकदृष्टिकोणस्य, आलोचनात्मक- चिन्तनस्य, भारतीय-ज्ञान- परम्परायाः च संवर्धनाय एतादृशानाम् शैक्षणिक- संगोष्ठीनाम् आयोजनम् आवश्यकम् अस्ति। स्नातकोत्तर-दर्शनशास्त्र-विभागस्य विभागाध्यक्षा डॉ. शिखरवासिनी मैत्रेयी-याज्ञवल्क्यसंवादं रेखा जयन्ती अवदत् यत् सांसारिकसम्पत्तेः भौतिक- उपलब्धीनाञ्च अपेक्षया आत्मज्ञानस्य महत्त्वं बहुव्यापकं स्थायी च वर्तते। आत्मज्ञानम् एव परम-सत्यस्य मार्गं प्रदर्शयति।

संगोष्ठ्याः विषयपरिचयः ललित- नारायण- मिथिला- विश्वविद्यालयस्य स्नातकोत्तर- आंग्ल- विभागस्य सहायकप्राध्यापकेन डॉ. वीरेन्द्रकुमारमिश्रेण प्रस्तुतितः। सः अवदत् यत् भारतीय-दर्शन इदं संवादम् आत्मायाः, ज्ञानस्य, अमरत्वस्य च अवधारणानां अवगमनाय एकम् महत्त्वपूर्णम् आधारं प्रददाति।

संगोष्ठ्याः मुख्यवक्ता, पाटलिपुत्र- विश्वविद्यालयस्य आर.पी.एम. महाविद्यालयस्य सेवानिवृत्त- विभागाध्यक्षः प्रो. नागेन्द्रमिश्रः स्वव्याख्याने मैत्रेयी-याज्ञवल्क्ययोः संवादस्य गभीरं दार्शनिकं विश्लेषणं प्रस्तुतवान्।

विशिष्टवक्ता, ल. ना. मिथिला-विश्वविद्यालयस्य स्नातकोत्तर- दर्शनशास्त्र-विभागस्य सेवानिवृत्त- विभागाध्यक्षः प्रो. एस. सी. मिश्रः मैत्रेयी- याज्ञवल्क्य-संवादस्य दार्शनिकौपनिषदिक- सन्दर्भान् प्रकाश्य आत्मा-ब्रह्मणोः सम्बन्धस्य व्याख्यां कृतवान्। सः भारतीय-ज्ञान-परम्परायां आत्मबोधस्य केन्द्रीय-भूमिकां रेखांकितवान्।बी.आर.ए.बी. विश्वविद्यालयस्य (मुजफ्फरपुर) स्नातकोत्तर-दर्शनशास्त्र- विभागस्य विभागाध्यक्षः प्रो. निखिलरंजनप्रकाशः स्वविचारेषु आत्मज्ञानस्य, आध्यात्मिक-चेतनायाः, जीवनस्य चरम- उद्देश्यस्य च सन्दर्भे अस्य संवादस्य प्रासंगिकतां स्पष्टीकृतवान्। संगोष्ठ्याः द्वितीयसत्रे विभिन्न-विश्वविद्यालयानाम् महाविद्यालयानाञ्च अनेके प्राध्यापकाः शोधार्थाश्च स्वशोधपत्राणि प्रस्तुतवन्तः। अस्य सत्रस्य अध्यक्षता स्नातकोत्तर-दर्शनशास्त्रविभागस्य वरिष्ठ- सहायक- प्राध्यापकः डॉ. संजीव साह कृतवान्, सः अवदत् च यत् जीवनं आत्मदृष्ट्या पश्यन् एव यथार्थरूपेण दर्शनं भवति। आत्मा, अमरत्वं ब्रह्मज्ञानञ्च दार्शनिक अभिवृत्तिः एव मोक्षस्य मार्गं प्रशस्तं करोति।महाविद्यालयस्य बर्सर-राजनीतिशास्त्र-विभागस्य च विभागाध्यक्षः डॉ. जमशेद आलम अवदत् यत् मैत्रेयी-याज्ञवल्क्ययोः संवादः जीवनस्य यथार्थस्य संवादः अस्ति। फारसी- विभागस्य विभागाध्यक्षः डॉ. अब्दुस सलाम जिलानी अवदत् यत् दर्शनेन समाजाय जीवनयापनाय आध्यात्मिकदिशः प्रदीयन्ते।

द्वितीयसत्रस्य धन्यवादज्ञापनं मैथिली- विभागस्य विभागाध्यक्षा डॉ. सुनीताझा कृतवती।अस्यां राष्ट्रीयसंगोष्ठ्याम् एम. आर. एम. महाविद्यालयस्य संस्कृतविभागस्य प्राध्यापिका डॉ. सुकृतिः, जन्तुविज्ञानस्य डॉ. सोमारानीकोले, डॉ. सियारामप्रसाद चौरसिया, हिन्दीविभागस्य सेवानिवृत्तः डॉ. मोहितठाकुरः, डॉ. मुन्ना साह, डॉ. अब्दुररफे, डॉ. विजयशङ्करपण्डितः, डॉ. सञ्जीलः, डॉ. जावेद अख्तरः, डॉ. सुभाषकुमारः, डॉ. निशाकुमारी, डॉ. अतहर सादिकः, बासरा बरकाब, डॉ. शगुफ्ता निगारः, डॉ. पूजाकुमारी, डॉ. सना प्रवीणः, डॉ. तहफीजुर रहमानः, डॉ. राजकिशोर पासवानः छात्रछात्राश्च उपस्थिताः आसन्, ये कार्यक्रमं सफलम् अकुर्वन्।

दीपावल्या अवसरे इतिहासविभागस्य अद्वितीयः

प्रयासः, विद्यार्थिभिः पोस्टकार्ड माध्यमेन प्रेषिताः शुभकामनाः



हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा। सरदारपटेल- विश्वविद्यालय मण्डी इत्यस्य इतिहासविभागेन दीपावलिपर्वणः पावनावसरे पोस्टकार्डमाध्यमेन शुभकामनासन्देश प्रेषणस्य अद्वितीयः प्रयासः कृतः। अस्य प्रयासस्य अन्तर्गतं विभागस्य विद्यार्थिभिः स्व परिवारजनेभ्यः मित्रेभ्यः शिक्षकेभ्यः परिचितेभ्यश्च हस्तलिखित शुभकामना सन्देशं प्रेषयित्वा दीपावल्याः आनन्दः सहभाजितः। विद्यार्थिभिः प्रायः पञ्चशतं पोस्टकार्ड प्रेषिताः। विभागेन परम्परागत- भारतीय- संस्कृतेः आत्मीयसंवादस्य च प्रोत्साहनस्य उद्देश्योत्पन्नेन दीपावलि अवसरे एतं प्रयासम् कृत्वा एतं पर्व सामाजिक- सद्भावस्य आत्मीयतायाः सांस्कृतिक- सम्बन्धस्य च माध्यमं रचितवान्। अस्मिन् अवसरे विश्वविद्यालयस्य कुलपतिः आचार्यः ललितकुमार अवस्थीमहोदयः इतिहासविभागस्य अस्य प्रयासस्य श्लाघां कुर्वन् अवदत् यत् भारतीय- उत्सवाः अस्माकं समृद्ध- सांस्कृतिक- धरोहरस्य सामाजिक एकतायाः पारस्परिक सद्भावस्य च प्रतीकाः सन्ति। दीपावलिसदृशे पर्वणि पोस्टकार्डमाध्यमेन शुभकामनासन्देशप्रेषणस्य प्रयासः विद्यार्थिनः स्व सांस्कृतिक मूलैः सह योजयितुम् सह एव तेषु संवेदनशीलतायाः रचनात्मकतायाः सामाजिक उत्तरदायित्वस्य च भावनायाः विकासे सहायकः अस्ति। कुलपतिः अवदत् यत् विश्वविद्यालयस्य उत्तरदायित्वं केवलं शैक्षणिक ज्ञान प्रदानाय न अपि तु विद्यार्थिषु मानवीयमूल्यानां सांस्कृतिक- चेतनायाः सामाजिकसमरसतायाः च विकासः अपि अस्ति। इतिहासविभागस्य अयं प्रयासः अस्मिन् एव दिशि एकः प्रेरणादायी क्रमः अस्ति।इतिहासविभागस्य विभागाध्यक्षः डॉ राकेशकुमारशर्मामहोदयः सूचितवान् यत् अद्यतने डिजिटलयुगे यत्र शुभकामना सन्देशप्रेषणाय सोशलमीडिया मोबाईल इत्येतयोः व्यापकप्रयोगः क्रियते, तत्र पोस्टकार्ड माध्यमेन सन्देश प्रेषणस्य अयं प्रयासः भारतीय सांस्कृतिक परम्पराणां पुनर्जीवनस्य एकः सार्थकः प्रयासः अस्ति। सः अवदत् यत् पोस्टकार्ड केवलं शुभकामनासन्देशस्य माध्यमं नास्ति अपि तु आत्मीयतायाः भावनात्मक सम्बन्धस्य व्यक्तिगत अभिव्यक्तिः च प्रतीकः अस्ति। सः सूचितवान् यत् अस्य प्रयासस्य उद्देश्यं विद्यार्थिषु पत्र लेखन परम्परायाः प्रति रुचि विकासः, भारतीय संस्कृति सामाजिक मूल्यानां च प्रति जागरूकता वर्धनं, पारस्परिकसम्बन्धेषु आत्मीयतायाः संवेदनशीलतायाः च प्रोत्साहनम् अस्ति। अस्य प्रयासस्य विषये विद्यार्थिषु विशेषः उत्साहः दृष्टः। विद्यार्थिभिः पोस्टकार्डमाध्यमेन देशस्य राष्ट्रपतेः प्रधानाप्रधानेन च हिमाचल प्रदेशस्य मुख्यमन्त्रिणः राज्यपालस्य शिक्षामन्त्रिणः सह विश्वविद्यालयस्य कुलपतेः कुलसचिवस्य सर्वेषां अधिष्ठातानां विभागाध्यक्षाणां वित्त- अधिकारिणः परीक्षा- नियन्त्रकस्य शिक्षकाणां स्व सम्बन्धिनां परिचितानां च कृते पोस्टकार्डमाध्यमेन दीपावल्याः शुभकामनाः प्रेषिताः। अस्य प्रयासः विद्यार्थिषु पत्र लेखन परम्परायाः प्रति रुचि जाग्रतः कुर्वन् आत्मीयतायाः सामाजिक सम्बन्धस्य च भावनायाः अपि सुदृढीकरणम् अकरोत्।

हिमसंस्कृतवार्ताः, ईदरधीरजः

वार्ता-संवादः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

काव्या- नमस्ते नन्दिनि। अद्य बहु-विचित्राः वार्ताः सन्ति। प्रथमा वार्ता कर्मकर-विषये अस्ति। एकेन कर्मकरेण पूर्वमेव स्वस्य अवकाशः स्वीकृतः। परन्तु तस्य प्रबन्धकेन अवकाशसमये अपि सभाभ्यः आह्वानं कृतम्। यदा कर्मकरेण तत् न अङ्गीकृतं, तदा प्रबन्धकेन सः तर्जितः।

नन्दिनी- अहो! एतत् तु अतीव अनुचितम्। प्रबन्धकेन कर्मकरेण सह महान् कुव्यवहारः कृतः। अपरा वार्ता अपि विस्मयकरी अस्ति। 'गॉडजिला' इति नूतने चलच्चित्रे अतीव तीव्र-ध्वनिः अभूत्। तेन कोलाहलेन एकस्य दर्शकस्य घटीयन्त्रेण स्वास्थ्य-हानि-सूचना दत्ता। ध्वनिः अतीव भयङ्करः अभूत् इति तेन उक्तम्।

काव्या- बाढम्, एतादृशः ध्वनिः श्रवणशक्तिकृते हानिकारकः एव। चलच्चित्रनिर्मातृभिः अत्र सावधानता न कृता। इदानीम् अमेरिकादेशस्य वार्ता श्रूयताम्। तत्र मध्यकालीने निर्वाचने 'डेमोक्रेट' पक्षेण महान् विजयः प्राप्तः। तदनन्तरं सामाजिकमाध्यमेषु 'ट्रम्प' महोदयस्य उपहासचित्राणि सर्वैः दृष्टानि। अन्तर्जाले तस्य बहु-उपहासः कृतः।

नन्दिनी- सत्यम्। राजनीतौ तु सर्वदा एतादृशः उपहासः जनैः कृतः एव, तत्र किमपि नूतनं नास्ति। परन्तु कृत्रिम-बुद्ध्या अद्यत्वे किं किं न क्रियते! एका नूतनवार्ता चलच्चित्रक्षेत्रात् आगता। कृत्रिमबुद्ध्या एकं चलचित्रं निर्मितम्। तस्मिन् चित्रे पुरातन्या अभिनेत्र्या 'आशा-पारेख' महोदयया बर्गरखाद्यं खादितं, 'मधुबालया' अन्तर्जाले सजीवसम्भाषणं कृतम् इति दर्शितम्। एतत् विचित्रं चित्रं सर्वैः दृष्टम्, बहुप्रसारितं च।

काव्या- अहो! तन्त्रज्ञानेन महान् चमत्कारः कृतः। पुरातन-कालीनाभिः अभिनेत्रीभिः अपि आधुनिकं कार्यं कृतम् इति अतीव हास्यास्पदम्। अद्य जगति एतादृशः विचित्राः घटनाः एव जाताः।

नन्दिनी- सत्यम् उक्तं त्वया। अद्यतन्यः वार्ताः अतीव रोचिकाः अभूवन्। सर्वासां वार्तानां सङ्कलनाय कृतज्ञताम् अर्पयामि तुभ्यम्।

धनत्रयोदश्याः पावनपर्वणि धन्वन्तरेः, महालक्ष्म्याः कुबेरस्य च पूजनम्

आरोग्य-समृद्धि-सदाचारस्य च सन्देशं ददाति धनतेरसपर्व।

- वृजेश कुमार पाण्डेय

ॐ नमो भगवते वासुदेवाय
धन्वन्तरये अमृतकलशहस्ताय।
सर्वामयविनाशनाय
त्रैलोक्यनाथाय श्रीमहाविष्णवे नमः॥

कार्तिकमासस्य कृष्णपक्षे त्रयोदश्यां तिथौ आचर्यमाणं धनत्रयोदशीपर्व हिन्दूनां प्रमुखेषु पावनपर्वसु अन्यतमम् अस्ति। अयं पर्व दीपोत्सवस्य शुभारम्भस्य प्रतीकः मन्यते। अस्मिन् वर्षे नवम्बरमासस्य षष्ठे दिनाङ्के शुक्रवासरे धनतेरसपर्व आचरिष्यते। अस्मिन् पावने अवसरे भगवान् धन्वन्तरिः, माता महालक्ष्मीः तथा भगवान् कुबेरः श्रद्धाभक्तिभ्यां पूज्यन्ते। धार्मिक- मान्यतानुसारं भगवान् धन्वन्तरिः आरोग्यस्य आयुर्वेदस्य च अधिष्ठाता देवः अस्ति।

पूजायाः शुभमुहूर्तः

अस्मिन् वर्षे धनतेरसपूजायाः शुभसमयः सायं ०५:४४ वादनात् ०७:४२ वादनपर्यन्तं निर्धारितः अस्ति।

पूजनविधिः-धनत्रयोदश्याः दिने गृहस्य पूजास्थानस्य च स्वच्छता क्रियते। सायंकाले दीपाः प्रज्वाल्य भगवान् धन्वन्तरिः स्मर्यते तथा उत्तमस्वास्थ्यस्य, दीर्घायुषः, सुखसमृद्धेश्च प्रार्थना क्रियते।तदनन्तरं माता महालक्ष्म्याः कुबेरदेवस्य च पूजनं कृत्वा पुष्पाणि, फलानि, सात्त्विकनैवेद्यं च समर्प्यते। अस्मिन् दिने नवीनपात्राणां, धातुनिर्मित- वस्तूनां तथा आवश्यकवस्तूनां क्रयणम् अपि शुभं परम्परागतं च मन्यते।



पर्वणः आध्यात्मिकः सन्देशः-

धनत्रयोदशीपर्व अस्मान् शिक्षयति यत् वास्तविकं धनं केवलं वित्तसम्पत्तिः नास्ति, अपि तु उत्तमं स्वास्थ्यं, मानसिकसन्तुलनं, सदाचारः, विवेकपूर्णं जीवनं च वास्तविकसमृद्धेः आधाराः सन्ति। अतः अस्मिन् पावने पर्वणि सर्वे जनाः आरोग्यस्य, सुखस्य, शान्तेः, समृद्धेश्च कामनां कुर्वन्तु।

सर्वे भवन्तु सुखिनः। सर्वे सन्तु निरामयाः।
धनत्रयोदशीपर्वणः हार्दिक्यः शुभकामनाः।

राजगढ़निवासी लोकेशशर्मा

विद्यावारिध्युपाधिं सम्प्राप्य वर्धितवान् क्षेत्रगौरवम्



हिमसंस्कृतवार्ताः- वत्सदेशराजशर्मा, राजगढ़म्। राजगढ़मण्डलान्तर्गत-भनोगग्रामनिवासिना लोकेशशर्मणा षड्वर्षीयकठिनपरिश्रमेण निरन्तराध्ययनेन गवेषणया च हिमाचलप्रदेश- विश्वविद्यालयस्य शिमलायाः संस्कृतविभागात् विद्यावारिधि उपाधिः सम्प्राप्ता। तस्य शोधकार्यस्य अन्तिममौखिकपरीक्षायाः साफल्यपूर्णावसानेन सह तस्य बहुवर्षीया शोधसाधना सिद्धिपदं प्राप्ता। अनेन साफल्येन सम्पूर्णे क्षेत्रे प्रमोदतरङ्गः प्रसृतः। अष्टाविंशतिवर्षीयः डॉ लोकेशशर्मा सम्प्रति हिमाचलप्रदेशस्य उच्चशिक्षाविभागे सेवारतोऽस्ति। अस्य पिता देवदत्तशर्मा हिमाचलप्रदेश मिल्कफेड संस्थायां कार्यरतो वर्तते माता च कल्पना शर्मा गृहिणी अस्ति। डॉ. लोकेशशर्मणः शोधक्षेत्रं केशवाचार्यप्रणीतम् आधुनिकसंस्कृतसाहित्यम् आसीत्। शोधकार्यस्य अवधौ सः भारतीयदर्शनस्य काव्यशास्त्रस्य हिमाचलप्रदेशस्य लोकसंस्कृतेः अत्रत्यायाः समृद्धायाः देवपरम्परायाश्च गम्भीरमध्ययनं कृतवान्। तस्यैषः शोधप्रबन्धः आधुनिक- संस्कृतसाहित्यमाध्यमेन भारतीय-ज्ञान- परम्परायाः हिमाचलस्य सांस्कृतिक आध्यात्मिकधरोहरायाश्च शास्त्रीयदृष्ट्या अवगमने महत्त्वपूर्णः प्रयासः वर्तते। शैक्षणिकक्षेत्रेऽपि डॉ. लोकेशशर्मणा स्वप्रतिभायाः कठोरश्रमस्य च परिचयः प्रदत्तः। सः स्नातकोत्तर- द्वितीयसत्रादेव विना किमपि शिक्षणकेन्द्रं बहुवारं राष्ट्रियस्तरीय यूजीसी नेट पात्रतापरीक्षायाम् उत्तीर्णो जातः। अपि च तेन राज्यस्तरीय- पात्रतापरीक्षा सेट अपि बहुवारम् उत्तीर्णा। स्वकीय- शैक्षणिकयोग्यतायाः उपलब्धीनां च बलेन सः बहुषु विश्वविद्यालयेषु महाविद्यालयेषु च सहायकाचार्यपदस्य साक्षात्कारार्थं चितोऽभवत्। शोध शैक्षणिकगतिविधिषु तस्य सक्रियता केवलं विश्वविद्यालयस्तरं यावदेव सीमिता नासीत् अपि तु तेन अन्ताराष्ट्रियस्तरेऽपि भारतीयज्ञानपरम्परा हिमाचलप्रदेशस्य सांस्कृतिकधरोहरश्च समुपस्थापिता। इण्डोनेशिया मॉरीशस देशयोः आयोजितेषु अन्ताराष्ट्रियसम्मेलनेषु तेन शोधपत्राणि वाचितानि। इण्डोनेशियादेशे सः भारतीयदर्शनस्य तात्त्विकावधारणासु चिन्तनपरम्परायां तस्य वैश्विक- सांस्कृतिक-महत्त्वविषये च शोधपत्रं प्रस्तुतवान्। तथैव मॉरीशसदेशे आयोजिते सम्मेलने सः हिमाचलस्य विशिष्टदेवपरम्परायाः लोकधार्मिकविश्वासानां लोकसंस्कृतेश्च विविधान् पक्षान् अकादमिकदृष्ट्या समुपस्थापितवान्। डॉ. लोकेशशर्मणः शैक्षणिक-यात्रायाम् इयम् एका महती उपलब्धिः वर्तते। तस्यैतेन साफल्येन न केवलं तस्य परिवारस्य अपितु राजगढ़क्षेत्रस्य समग्रस्य हिमाचलप्रदेशस्य च गौरवं संवर्धितम्।

शोधनिर्देशिकायाः डॉ. दीपलतायाः मार्गदर्शने सम्पन्नं लोकेशशर्मणः शोधकार्यम्

राजगढ़स्थभनोगग्रामनिवासिनः डॉ. लोकेशशर्मणः अस्याः विद्यावारिधिसिद्धेः पृष्ठतः तस्य शोधनिर्देशिकायाः डॉ. दीपलतायाः महत्त्वपूर्णं मार्गदर्शनम् आसीत्। डॉ. दीपलता हिमाचलप्रदेश- विश्वविद्यालयस्य संस्कृतविभागे सहायकाचार्यपदे कार्यरता वर्तते। अध्यापन शोधक्षेत्रयोः तस्याः एकोनविंशतिवर्षीयो दीर्घानुभवोऽस्ति। सा २०१६ तमस्य वर्षस्य सितम्बरमासस्य त्रयोविंशतितमे दिनाङ्के विश्वविद्यालये नियमितप्राध्यापकरूपेण पदभारं गृहीतवती। डॉ. लोकेशशर्मणा महामहोपाध्याय आचार्यकेशवरामशर्मणः संस्कृतसाहित्याय योगदानम् इति विषये स्वकीयः शोधप्रबन्धः डॉ. दीपलतायाः कुशलनिर्देशने सम्पूर्णः कृतः। षड्वर्षं यावत् प्रवृत्तेऽस्मिन् शोधकार्ये डॉ दीपलता न केवलं विषयचयनमारभ्य प्रबन्धलेखनं यावत् सततं मार्गमदर्शयत् अपि तु भारतीयदर्शन काव्यशास्त्र हिमाचल- देवपरम्परा- सदृशानां गूढविषयाणां सरलतया अवगमनेऽपि महतीं भूमिकां निरवहत्। अस्मिन्नवसरे डॉ. लोकेशशर्मा न्यवेदयत् यत् गुरुं विना शोधयात्रा अपूर्णा भवति। डॉ. दीपलतामहोदयायाः वात्सल्येन अनुशासनेन विद्वत्तापूर्णमार्गदर्शनेन चैव एतत् शोधकार्यं साफल्येन सम्पन्नं जातम्। सः स्वशोधप्रबन्धं गुरुचरणयोः समर्प्य तस्यै हार्दीं कृतज्ञतां ज्ञापितवान्। क्षेत्रवासिभिरपि डॉ. दीपलतायाः कुशलमार्गदर्शनं संशंस्य उक्तं यत् योग्यः गुरुरेव स्वशिष्यं यशसः शिखरं प्रापयितुं समर्थो भवतीति।



हिमसंस्कृतवार्ता
असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

व्याकरणचिन्तनम्- ०३

अण् (अ)- प्रत्ययप्रयुक्तानि विंशतिवाक्यानि, अभ्यासाय- प्रथम स्वरस्य वृद्धिः, अर्थः- अस्य पुत्रः, अस्य भक्तः इति।

सूत्रम्- तस्येदम्, शिवादिभ्योऽण्।

२०- वाक्योदाहरणानि एवं सन्ति-

१. एषः आश्वः रथः अस्ति।
२. सः मानवः दयालुः अस्ति।
३. शैवः जनः शिवं पूजयति।
४. वैष्णवः धर्मः सदाचारयुक्तः अस्ति।
५. ब्राह्मः मुहूर्तः पवित्रः अस्ति।
६. पार्थः कृष्णस्य परममित्रं, श्रेष्ठः योद्धा च आसीत्।
७. राघवः रामः सत्यवादी आसीत्।
८. यादवः कृष्णः अर्जुनं धर्मयुद्धाय उपदिष्टवान्।
९. पाण्डवाः पञ्च आसन्, ते धर्मपरायणाः।
१०. कौरवाः शतम् आसन्, ते च आततायिनः।
११. दाशरथः रामः वनम् अगच्छत्।
१२. गाङ्गं जलं पवित्रम् अस्ति।
१३. तस्य सिद्धान्तः भौतिकः अस्ति।
१४. जैनः धर्मः हिंसारहितः भवति।
१५. बौद्धं दर्शनं करुणायुक्तम् अस्ति।
१६. शाक्तः उपासकः शक्तिं पूजयति।
१७. दैवः नियमः अटलः अस्ति।
१८. पैतामहं धनं रक्षणीयम्।
१९. औपनिषदं ज्ञानं गहनम् अस्ति।
२०. साम्प्रदायिकं विवादं त्यजेत्।

अत्र, अश्व+ अण् = आश्वः,
मनु+ अण् = मानवः (मनुपुत्रः),
शिव+ अण् = शैवः (शिवभक्तः),
एवमेव, रघुवंशीयः = राघवः (रामः),
यदुवंशीयः = यादवः (कृष्णः)
इत्यादीनि अण्-प्रत्ययप्रयुक्तानि पदोदाहरणानि सन्तीति।



कृषकाणां कृते डिजिटलपरिचयपत्रम्।

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, नवदेहली। देशस्य एकादशकोटिः 'कृषकाः कृषकपरिचयपत्रम्' इति डिजिटलपरिचयपत्रेण युक्ताः अभवन्। एतेषु षड्विंशतिः प्रतिशतं महिलाः सन्ति। एषा योजना कृषिक्षेत्रस्य आधुनिकीकरणाय महत्त्वपूर्णं पदम् अस्ति। अस्याः माध्यमेन कृषकाणां कृते सर्वकारीयसेवानां लाभः सुलभः भविष्यति। कृषकाः अपि आधुनिकप्रौद्योगिक्या सह युक्ताः भविष्यन्ति। अनेन डिजिटलपरिचयपत्रेण कृषकाणां कार्याणि सरलानि भविष्यन्ति तथा कृषिक्षेत्रस्य विकासः अपि भविष्यति। अधुना कृषकाः अपि डिजिटलयुगे स्मार्टकृषकाः भवन्ति।

संस्कृतभाषायाः प्रचारप्रसाराय अनन्य- आरम्भः

संस्कृतभारत्याः उत्तरबङ्गप्रान्तस्य सप्तदिवसीयस्य आवासीयप्रबोधनवर्गस्य भव्यः समापनसमारोहः



हिमसंस्कृतवार्ताः- विलासमहलदारः गाजोलम्, ५ नवम्बर, २०२६। संस्कृतभाषायाः प्रचाराय, प्रसाराय, जनजीवने संस्कृतस्य व्यवहारं च वर्धयितुं संस्कृतभारत्याः उत्तरबङ्गप्रान्तेन एकः सप्तदिवसीयः आवासीयः 'प्रबोधनवर्गः' आयोजितः। अस्य वर्गस्य भव्यः समापनसमारोहः २०२६ तमस्य वर्षस्य नवम्बरमासस्य ३ दिनाङ्के गाजोलनगरस्य भारतसेवाश्रमसङ्घस्य घाक्शोल- आश्रमप्राङ्गणे सम्पन्नः अभवत्। अयं प्रशिक्षणवर्गः अक्तूबरमासस्य २७ दिनाङ्कात् नवम्बरमासस्य ४ दिनाङ्कपर्यन्तम् आयोजितः आसीत्। अस्य आयोजनस्य कारणेन गाजोलक्षेत्रे तथा समीपस्थेषु प्रदेशेषु संस्कृतप्रेमिषु विशेषः उत्साहः, आनन्दः च दृश्यते स्म।संस्कृतभाषा न केवलं प्राचीनभारतीयज्ञानस्य अमूल्यः निधिः, अपि तु भारतीयसभ्यतायाः, संस्कृतेः, दर्शनस्य जीवनमूल्यानां च दिव्यः आधारः अस्ति। संस्कृतभाषा अस्माकं गौरवम्, अस्माकं परम्परा, अस्माकं जीवनस्य च अमूल्यः भागः अस्ति। अतः संस्कृतं केवलं पठनीयभाषा न भूत्वा जनानां दैनन्दिनजीवनस्य सम्भाषणभाषा भवेत्, इति उद्दिश्य अयं प्रबोधनवर्गः आयोजितः।

अस्मिन् सप्तदिवसीये प्रशिक्षणवर्गे संस्कृते सरलसम्भाषणं, परस्परं विचारविनिमयः, दैनिकजीवने संस्कृतस्य प्रयोगः, संस्कृतभाषायां भाषणकौशलस्य विकासः इत्यादिषु विषयेषु विशेषः अभ्यासः अभवत्। आवासीयव्यवस्थायां प्रतिभागिनः प्रतिदिनं परस्परं संस्कृतेन सम्भाषणम् अकुर्वन्। एतेन तेषां संस्कृतभाषायां वक्तुं आत्मविश्वासः, स्वाभाविकता, भाषाकौशलं च वर्धितम्। संस्कृतं वक्तुं शक्यते, संस्कृतेन सर्वाः भावनाः अभिव्यक्तुं शक्यन्ते इति भावना प्रतिभागिनां मनसि दृढा अभवत्। अस्य समापनसमारोहे मुख्यातिथिरूपेण रायगञ्जस्य पार्वतीदेवी- उच्चविद्यालयस्य पूर्वतनशिक्षिका ऊषा भौमिक महोदया उपस्थिताः आसन्। तस्याः गरिमामयी उपस्थितिः कार्यक्रमस्य शोभां वर्धितवती। विशिष्टातिथिरूपेण संस्कृतभारत्याः पूर्वक्षेत्रस्य सम्पादकः जयसाहा महोदयः, उत्तरबङ्गप्रान्तस्य अध्यक्षः सिद्धनाथपाठकमहोदयः, उत्तरबङ्गप्रान्तस्य सम्पादिका तापसीमण्डलमहोदया च उपस्थिताः आसन्। अपि च गाजोलस्य भारतसेवाश्रमसङ्घस्य घाक्शोल- आश्रमस्य अध्यक्षः महाराजः अपि समुपस्थितः आसीत्। सर्वेषाम् अतिथीनां उपस्थित्या समारोहः विशेषरूपेण शोभितः अभवत्।

केवलं समापनसमारोहे एव न, अपि तु वर्गस्य विभिन्नेषु कार्यक्रमेषु अपि समाजस्य अनेकाः विशिष्टाः जनाः उत्साहेन भागम् अगृह्णन्। तेषु गाजोलस्य प्रसिद्धः व्यवसायी विधानचन्द्ररायः, गाजोलस्य विधायकः चिन्मय बर्मनः, समाजसेवी प्रमोदचन्द्र घोषः प्रमुखाः आसन्। तेषाम् आगमनेन सहभागितया च स्थानीयसमाजस्य संस्कृतभाषायाः प्रति अनुरागः, सहयोगभावना च स्पष्टतया प्रकटिता अभवत्। अनेन सिद्ध्यति यत् संस्कृतभाषायाः प्रचारः केवलं विद्यालयेषु महाविद्यालयेषु वा सीमितः विषयः नास्ति, अपि तु सम्पूर्णसमाजस्य दायित्वम् अस्ति। समापनकार्यक्रमे प्रतिभागिनः सप्तदिनानां स्वानुभवान्, संस्कृतसम्भाषणस्य आनन्दं, भविष्ये च संस्कृतप्रचारप्रसारकार्ये सक्रियभागग्रहणस्य सङ्कल्पं च प्रस्तुतवन्तः। ते अनुभूतवन्तः यत् संस्कृतस्य महत्त्वं केवलम् अस्याः प्राचीनतायां साहित्यवैभवे वा निहितम्, अपि तु अस्याः जीवने प्रत्यक्षप्रयोगे, सरलतायां तथा जनानां परस्परं विचारविनिमयस्य माध्यमत्वे अपि निहितम् अस्ति।

संस्कृतभारत्याः एषः प्रयासः केवलं भाषाशिक्षणस्य कार्यक्रमः नास्ति, अपि तु भारतीयज्ञानपरम्परायाः, संस्कृतेः, गौरवशालिन्याः परम्परायाः च नूतनपीढ्या सह सम्बन्धस्थापनस्य एकः प्रशंसनीयः प्रयासः अस्ति। यदा भाषा जनानां मुखे भवति, तदैव सा जीविता भवति। यदा वयं संस्कृतेन वदामः, तदा संस्कृतभाषा अस्माकं जीवने पुनः प्रवहति। अतः संस्कृतं पठामः, संस्कृतेन वदामः, संस्कृतं च जीवने आचरामः इत्येव अस्य प्रबोधनवर्गस्य मुख्यः सन्देशः आसीत्। सप्तदिनानां निरन्ताराभ्यासस्य, परिश्रमस्य, साधनायाः च अनन्तरम् अस्य वर्गस्य समापनं जातम्। किन्तु वस्तुतः एषः समापनः न, अपि तु संस्कृतसम्भाषणस्य नूतनयात्रायाः शुभारम्भः एव। प्रतिभागिनः स्वस्वक्षेत्रेषु संस्कृतभाषायाः प्रचारप्रसाराय सक्रियतया कार्यं करिष्यन्ति इति आशा व्यक्ता अभवत्। 'जयतु संस्कृतम्! जयतु भारतम्!' इति प्रेरणादायकेन उद्घोषेण संस्कृतभारत्याः उत्तरबङ्गप्रान्तस्य अयं प्रयासः गाजोलक्षेत्रस्य सम्पूर्णस्य उत्तरबङ्गस्य च भाषिकसांस्कृतिकक्षेत्रे एकः स्मरणीयः, प्रशंसनीयः, प्रेरणादायकः च अध्यायः भविष्यति।

उपनयनसंस्कारे सूर्य-किरणानां महिमा

उपनयनसंस्कारे आचार्यः माणवकाय 'उपनयनात्पूर्वं तस्मै समुद्वादूर्मिः (ऐ. 2.3.2)' इत्यनेन मन्त्रेण माणवकाय प्रोक्षणं करोति। एतत् आपस्तम्बगृह्यसूत्रानुसारम्।अस्य मन्त्रस्य स्थूलार्थः - समुद्रात् मधुयुक्ताः तरङ्गाः मम समीपे आगताः। तरङ्गकारणीभूताः किरणाः अपि आगताः सन्ति। एते किरणाः एव चैरस्माकं पितरः (देवताभिः सह) सपीति प्राप्तवन्तः। एभिः किरणैः अहम् अमृतत्वं समश्नुयामिति।'सूर्यस्य रश्मिभिः पितरः सपीतिं कृतवन्तः। एभिः रश्मिभिः अहम् अमृतत्वम् अश्नुयाम्' इत्यत्र किञ्चित् विवरणम् अपेक्ष्यते।'पितरः देवताभिः सह सोमपानं कृतवन्तः। सोमपानस्य कारणं सोमलता। सोमलतावर्धनाय कारणं वृष्टिः। वृष्ट्याः कारणं सूर्यकिरणाः। अतः सूर्यकिरणैः पितरः देवताभिः सह समानपानं प्राप्तवन्तः' इत्यर्थः।ईदृशानां सोमपानकारणीभूतानां किरणानां प्रकाशेन अहम् अमृतत्वं प्राप्नुयाम् इत्यर्थः। 'अमृतत्व' मित्युक्ते 'शाश्वतसुखम्''ब्रह्मानन्दः' इति।सोमपानस्य कारणं सूर्यकिरणाः, अमृतत्वप्राप्तेः कारणं ज्ञानसूर्यकिरणाः। 'ज्ञानेन अहम् अमृतत्वं विन्देय' इति तात्पर्यम्।अतः अत्र सूर्यः केवलं भौतिकप्रकाशदाता एव न, अपितु ज्ञानप्रकाशस्य अपि प्रतीकम् अस्ति। यथा सूर्यकिरणैः वृष्टिः भवति, वृष्ट्या सोमलता वर्धते, सोमेन च पितरः देवताभिः सह आनन्दं प्राप्नुवन्ति, तथैव ज्ञानसूर्यस्य किरणैः अज्ञानान्धकारः नश्यति, अन्तःकरणं प्रकाशते, जीवः च ब्रह्मानन्दरूपम् अमृतत्वं प्राप्नोति।उपनयनसंस्कारस्य एषः एव मुख्यः उद्देशः अस्ति - माणवकः आचार्यस्य समीपं गत्वा, गायत्रीमन्त्रस्य उपदेशं प्राप्य, ज्ञानसूर्यस्य प्रकाशेन अन्धकारात् प्रकाशं प्रति, असत्यात् सत्यं प्रति, मृत्योः अमृतत्वं प्रति गच्छेत्। अतः प्रोक्षणक्रियया माणवकस्य शुद्धिः भवति, मनसः निर्मलता भवति, सः च वेदाध्ययनाय योग्यः भवति।



नेहा कुमारी (खुशी)

सन्तानां विदुषां न्यायविदां जनप्रतिनिधीनां च एकस्मिन् मञ्चे समागमः; चतुर्दश विभूतयः 'संस्कृतभूषणसम्मानेन' सम्मानिताः



रामायण- शोध- संगठनस्य भव्ये समारोहे डॉ. सुधांशु त्रिवेदी, स्वामी ज्ञानानन्दमहाराजः, आचार्यः सुदर्शनमहाराजः च समुपस्थिताः

हिमसंस्कृतवार्ताः- विश्वमोहनझा, नवदेहली। देवभाषायाः संस्कृतस्य गौरवस्य प्रतिष्ठापनाय, भारतीयज्ञानपरम्परायाः संरक्षणाय, सांस्कृतिक- चेतनायाश्च प्रसाराय समर्पितः 'संस्कृतभूषण- सम्मानसमारोहस्य' द्वितीयः भव्यः संस्करणात्मकः कार्यक्रमः बुधवासरे नवदेहल्याः चाणक्यपुरीक्षेत्रे स्थिते प्रतिष्ठिते आईटीसी मौर्य-होटले सम्पन्नः। रामायणरिसर्चकाउन्सिलस्य 'रामायणवार्ता' इति प्रकल्पस्य तत्त्वावधाने आयोजिते अस्मिन् समारोहे सन्तमहात्मनां, संस्कृतविदुषाम्, न्यायविदाम्, शिक्षाविदाम्, जनप्रतिनिधीनां, सांस्कृतिकक्षेत्रस्य विशिष्टविभूतीनां गरिमामयः समागमः अभवत्। देशस्य विभिन्नक्षेत्रेषु संस्कृतभाषायाः, साहित्यस्य, शिक्षायाः, वैदिकज्ञानस्य, भारतीयसंस्कृतेः तथा सामाजिक- सांस्कृतिकक्षेत्रस्य उन्नयनाय उल्लेखनीयं योगदानं कृतवत्यः चतुर्दश विशिष्टाः विभूतयः 'संस्कृतभूषणसम्मानेन' अलङ्कृताः।

अस्मिन् कार्यक्रमे मुख्यातिथिरूपेण प्रख्यातः राजनीतिकचिन्तकः, भारतीयजनतापार्टीति दलस्य राष्ट्रियनेता, राज्यसभासदस्यः डॉ. सुधांशुत्रिवेदी महोदयः उपस्थितः आसीत्। गीतामनीषी पूज्यः स्वामी ज्ञानानन्दमहाराजः, दक्षिणभारतस्य लोकप्रियः सन्तः ब्रह्मर्षिः पूज्यः डॉ. श्रीकृष्णचामुण्डदेश्वर्रा महर्षिः, सुप्रसिद्धः श्रीरामकथावाचकः पूज्यः आचार्यः श्रीसुदर्शनमहाराजः, श्रीजानकीकथायाः बालव्यासः वैदेहीनन्दनवेदान्तः च स्वीयेन पावनेन सान्निध्येन कार्यक्रमस्य शोभामवर्धयन्। सन्तानाम् आध्यात्मिक- मार्गदर्शनं, विदुषां ज्ञानविमर्शः तथा जनप्रतिनिधीनां सहभागिता च अस्य आयोजनस्य प्रमुखं वैशिष्ट्यम् अभवत्। अस्मिन् अवसरे रामायण- शोध- संगठनस्य मुख्यसंयोजकः, भारतीय- जनता- पार्टीति दलस्य निवृत्तः राष्ट्रिय- कोषाध्यक्षः राजेश अग्रवालः, 'रामायणवार्ता' इत्यस्य अध्यक्षः, छत्तीसगढराज्यस्य च सरगुजा- लोकसभाक्षेत्रस्य सांसदः श्रीचिन्तामणि महाराजः, भिण्ड-दतिया- लोकसभाक्षेत्रस्य सांसद् सन्ध्या रायवर्या रीवाविधानसभाक्षेत्रस्य विधायिका रीति पाठक, राजस्थानतः पूर्वं लोकसभायां निर्वाचिता रञ्जिता कोली च विशेषरूपेण उपस्थिताः आसन्। संस्थायाः सचिवयोः सुशान्तकुमारस्य पीताम्बरमिश्रस्य च आयोजनस्य व्यवस्थायां महत्त्वपूर्णं योगदानम् आसीत्।

न्यायपालिकायाः संस्कृतजगतश्च चतुर्दश विभूतयः सम्मानिताः

समारोहे सम्मानितेषु विशिष्टव्यक्तिषु महर्षिवाल्मीकि- संस्कृत- विश्वविद्यालयस्य, कैथलस्य कुलपतिः कर्नल (मानदः) प्रो. डॉ. राजेन्द्रकुमार अनायतः; संस्कृतभारत्याः अध्यक्षः, पूर्वकुलपतिः प्रो. डॉ. रमेशकुमार पाण्डेयः; राजस्थान- उच्चन्यायालयस्य जम्मू- कश्मीर- उच्चन्यायालयस्य च पूर्वमुख्यन्यायाधीशः न्यायमूर्तिः एस. एन. झा; सर्वोच्चन्यायालयस्य पूर्वन्यायाधीशः, राष्ट्रियमानवाधिकारायोगस्य अध्यक्षः न्यायमूर्तिः वी. रामासुब्रमण्यम्; सर्वोच्चन्यायालयस्य पूर्वन्यायाधीशः न्यायमूर्तिः मुकुन्दकम शर्मा च प्रमुखाः आसन्। एवमेव केन्द्रीय- संस्कृत- विश्वविद्यालयस्य, नवदेहल्याः कुलपतिः प्रो. श्रीनिवास वरखेडी; दिल्लीविश्वविद्यालयस्य मैत्रेयीमहाविद्यालयस्य पूर्वसंस्कृतप्राध्यापिका, WAVES-India- संस्थायाः अध्यक्षा तथा महासचिवा प्रो. (डॉ.) शशि तिवारी; प्रख्याता भारतविदुषी प्रो. डॉ. शशि बाला; 'विश्वस्य वृत्तान्तम्' इति संस्कृतसमाचारपत्रस्य प्रधानसम्पादकः आचार्यः शिवराजझा; संस्कृतशोधकर्त्री गायत्री राजपूत; बिहार- संस्कृत- शिक्षामण्डलस्य अध्यक्षः मृत्युञ्जयझा; विश्वविद्यालय- अनुदानायोगस्य संयुक्तसचिवः डॉ. मधुकर मारुति वावरे; पटनानगरस्य ज्योतिषाचार्यः डॉ. राजनाथझा, सांस्कृतिक- विषयक- सामग्री निर्माता श्रीभानुजः च सम्मानिताः।

बिहारस्य प्रतिनिधित्वं कुर्वन् ज्योतिषाचार्यः डॉ. राजनाथ झा 'संस्कृतभूषणसम्मानेन' विभूषितः।

अस्मिन् राष्ट्रियस्तरीये समारोहे बिहारस्य प्रतिनिधित्वं कुर्वन् ज्योतिषाचार्यः डॉ. राजनाथ झा अपि 'संस्कृतभूषणसम्मानेन' विभूषितः। सः ज्योतिर्वेद- विज्ञानसंस्थानस्य निदेशकः अस्ति। तस्य मार्गदर्शनेन संस्थानेन सञ्चाल्यमाने सनातन- वैदिकगुरुकुले विद्यार्थिभ्यः निःशुल्का वैदिकी शिक्षा प्रदीयते। ज्योतिषशास्त्रस्य वास्तुशास्त्रस्य च क्षेत्रयोः योगदानस्य अतिरिक्तं वैदिकज्ञानस्य, संस्कृतभाषायाः तथा सनातनपरम्परायाः संरक्षणे, संवर्धने, नवपीढ्यां प्रति तस्याः प्रसारणे च तेन क्रियमाणाः प्रयासाः विशेषतया प्रशंसिताः।

संस्कृतसंरक्षणस्य सङ्कल्पः, भारतीयज्ञानपरम्परायाः नवपीढ्या सह समन्वयस्य च आह्वानम्

समारोहे वक्तारः अवदन् यत् संस्कृतभाषा केवलं संवादस्य माध्यमं नास्ति, अपि तु भारतस्य ज्ञानपरम्परायाः, दर्शनस्य, विज्ञानस्य, संस्कृतेः, सभ्यतायाः तथा आध्यात्मिकचेतनायाः मूलाधारः अस्ति। संस्कृतभाषायाः संरक्षणं संवर्धनं च केवलं शिक्षणसंस्थानानां दायित्वं न, अपि तु समाजस्य प्रत्येकस्य वर्गस्य सामूहिकं कर्तव्यम् अस्ति। भारतीय- ज्ञान- विज्ञानयोः समृद्धां परम्परां आधुनिकसन्दर्भेषु नवपीढ्यां प्रति प्रेषयितुं विशेषप्रयत्नाः करणीयाः इति तैः प्रतिपादितम्।

कार्यक्रमस्य प्रभावशालि सुव्यवस्थितं च सञ्चालनं पीताम्बरमिश्रेण कृतम्। समारोहे बिहारराज्यात् सहितं देशस्य विभिन्नप्रदेशेभ्यः आगताः संस्कृतसेविनः, विद्वांसः, संस्कृतानुरागिणः सहभागिनः च अभवन्।

संस्कृतभूषणसम्मानसमारोहस्य द्वितीयं संस्करणम् अस्मिन् दृष्ट्या विशेषमहत्त्वपूर्णम् आसीत् यत् अत्र सन्तानाम् आध्यात्मिकचेतना, विदुषां बौद्धिकपरम्परा, न्यायविदां गरिमा, शिक्षाविदाम् अनुभवः, जनप्रतिनिधीनां सहभागिता एकस्मिन् मञ्चे समागता। अयं समारोहः संस्कृतभाषायाः राष्ट्रियप्रतिष्ठायाः अभिवृद्धये, भारतीय- सांस्कृतिक- वैभवस्य संरक्षणाय सामूहिक- सङ्कल्पस्य सशक्तं प्रतीकम् अभवत्।